दैनिकम् ई-संस्कृतवार्तापत्रम्

# हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ हेमन्त-ऋतुः
सूर्यः दक्षिणायनम् कार्तिकशुक्लाष्टमी
मार्गशीर्ष 02 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-12 ■ वर्ष-6 ■ अङ्क-21 | 1 | नवम्बर 17, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 भारतेन आगामिषु चतुर्षु वर्षेषु विश्वस्य शीर्ष-पौत-निर्माण-राष्ट्रेषु स्थानं प्राप्तुं लक्ष्यं निर्धारितम्

4 पूर्व-भाजपा-सर्वकारस्य निर्णयानाम् उद्घाटनं भविष्यति! सुक्खू-सर्वकारः शीघ्रमेव आनेष्यति श्वेतपत्रं, समितिः निर्मिता

12 जीवनप्रभात-स्थाने, गान्धिधाम्नि संस्कृतभारत्याः सौराष्ट्रप्रान्तस्य आवासीय- संस्कृत-प्रबोधनवर्गस्य शुभारम्भः

## भारतस्य विभाजनस्य प्रयासाः प्रचलन्ति, वैदेशिक-शक्तयः न इच्छन्ति यत् भारतं महान् राष्ट्रं भवेत् – डॉ. मोहनभागवतः



जोधपुरम्। राष्ट्रीयस्वयंसेवकसंघस्य सरसंघचालकः डॉ. मोहनभागवतः उक्तवान् यत् भारतं विश्वस्य मार्गदर्शकं निर्मातुं केवलं कस्यचित् एकस्य संघटनस्य, नेतुः अथवा व्यक्तेः प्रयासाः पर्याप्ताः न सन्ति, अपितु समग्रेण समाजेन संघटितं भूत्वा उत्थातव्यम्। यदा समाजस्य सामूहिकी शक्तिः जागर्ति, तदा असम्भवानि दृश्यमानानि कार्याणि अपि सिद्ध्यन्ति। एतदर्थं देशस्य प्रत्येकस्मिन् ग्रामे, वीथ्यां, उपवीथ्यां च पञ्चविंशतिः (२५), पञ्चाशत् (५०) अथवा शतं (१००) तादृशाः सेवाभाविनाः, चरित्रवन्तः, निःस्वार्थिनश्च जनाः सज्जीकरणीयाः, ये समाजस्य सुख-दुःखयोः सह तिष्ठेयुः स्वकीय-आचरणेन च अन्येषां समक्षम् आदर्शं प्रस्तुयुः।जोधपुरस्य शिकारपुरा-स्थिते श्रीराजाराम-आश्रमे आयोजितस्य राष्ट्रीयस्वयंसेवकसंघस्य प्रान्तस्तरीय-घोषवर्गस्य 'मरुनिनाद-२०२६' इत्यस्य समापनसमारोहे सः अवदत् यत् संघस्य एकमेव लक्ष्यम् अस्ति— 'भारतमातुः जयः'। सः उक्तवान् यत् अस्माकं ध्येयम् अस्ति यत् भारतस्य वैभवम् अमरं तिष्ठेत्। देशस्य उत्थानं कस्यचित् एकस्य समूहस्य नेतुः वा माध्यमेन न, अपितु सम्पूर्णस्य समाजस्य सक्रिय-सहभागितया एव सम्भवति। समाजस्य संघटित-शक्तेः बलेन एव धर्मस्य संरक्षणं राष्ट्रस्य च परमं वैभवं प्राप्तुं शक्यते।सः आगे अवदत् यत् वर्तमानसमये भारतस्य विभाजनस्य प्रयासाः क्रियन्ते। डॉ. भागवतेन अस्य तुलना आंग्लानां 'विभज्य शासनं कुरु' (फूट डालो और राज करो) इति नीत्या सह कृता। सः दृढतया उक्तवान् यत् अद्य भारतं सम्यक् दिशि अग्रे सरति, परन्तु विश्वस्य काश्चन शक्तयः न इच्छन्ति यत् भारतम् एकं महान् राष्ट्रं भवेत्।

## सुभाषितम्

कुसुमं वर्णसम्पन्नं
गन्धहीनं न शोभते।
न शोभते क्रियाहीनं
मधुरं वचनं तथा।।

भावार्थः- कोई पुष्प रंगों से सुशोभित होने पर भी शोभित नहीं होता है यदि वह गन्धहीन होता है। उसी प्रकार बिना कोई कार्य किए केवल मीठी मीठी बातें करने वाला मनुष्य भी शोभा नहीं देता है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263

सूचना- हिमसंस्कृतवार्तापत्रे दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्राकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा, प्रचारगणः- जगदीश डाभी गुजरातम्, बृजेश कुमार पाण्डेया, उ.प्र, सत्येन्द्रपाठकः उ.प्र, डा.विमलेश झा बिहारम्, डा.राघवनाथ झा बिहारम्, डॉ.पद्मनाभः हिमाचलम्, डा.निशिकान्त पाण्डेयः प.बंगाल, नवीन ममगाईं उत्तराखण्ड, कुलदीप मैन्दोला उत्तराखण्ड, डा.नवीनशर्मा हरियाणा, अजय कुमार आर्य पंजाब, ईशान तिवारी दिल्ली, रवि खरडिहालः कर्नाटक, डॉ.वर्षा टोणगांवकरः, सुधा साळवे महाराष्ट्रम्, ईदर धीरजः आन्ध्रप्रदेशः, नारद उपाध्यायः, डा.नयन ज्योति शर्मा असम

## प्रधानमन्त्री नरेन्द्रमोदी त्रयोविंशतितमे (२३) आसियान-भारत-शिखरसम्मेलने एकविंशतितमे (२१) पूर्व-एशिया-शिखरसम्मेलने च भागं ग्रहीतुं मनीला-नगरं प्राप्तवान्



मनीला (फिलीपींस)। प्रधानमन्त्री श्रीनरेन्द्रमोदी त्रयोविंशतितमे (२३) आसियान-भारत-शिखरसम्मेलने तथा एकविंशतितमे (२१) पूर्व-एशिया-शिखरसम्मेलने च भागं ग्रहीतुं फिलीपींस-देशस्य राजधानीं मनीला-नगरं प्राप्तवान्। एषा यात्रा भारतस्य 'एक्ट ईस्ट' नीतौ तथा हिन्द-प्रशान्त-दृष्टिकोणे आसियान-संगठनस्य केन्द्रीयभूमिकां तेन सह भारतस्य दृढां सहभागितां च दर्शयति। फिलीपींस-देशस्य सूचना-संचार-प्रौद्योगिकी-विभागस्य सचिवेन रॉबर्ट जोसेफ "जय" मोंटेस डी क्लारो इत्यनेन प्रधानमन्त्रिणः स्वागतं कृतम्।मनीला-नगरे आगमने अनिवासि-भारतीयैः (प्रवासी-भारतीयैः) प्रधानमन्त्रिणः भव्यं स्वागतं कृतम्। 'तमिल-संगम' इत्यस्य सदस्यैः प्रधानमन्त्रिणः स्वागतार्थम् एका मनोहरा 'रंगोली' निर्मिता, यस्यां "जनसेवायाः पञ्चविंशतिः वर्षाणि: विकसितभारतं प्रति एका यात्रा" इति विषयः प्रदर्शितः आसीत्।एकस्मिन् सांस्कृतिककार्यक्रमे प्रधानमन्त्रिणा फिलीपींस-देशीयैः भारतीयमूलस्य च छात्रैः क्रियमाणं 'पूर्णकुम्भ-श्लोकस्य' पाठनं दृष्टम्। एतदतिरिक्तं तेन इलिगन-नगरस्य 'इंटीग्रेटेड परफॉर्मिंग आर्ट्स गिल्ड' (IPAG) इति संस्थया प्रस्तुतं 'सीताः द रामायण रिविजिटेड' नामकं नाटकम् अपि अवलोकितम्।स्वस्य प्रस्थान-वक्तव्ये श्रीमोदी अवोचत् यत् आसियान्-देशैः सह भारतस्य सम्बन्धः अस्माकं एक्ट्-ईस्ट्-नीतेः हृदय-स्थले विराजते अथ महासागर दृष्टिकोणे केन्द्रीयं स्थानम् अलङ्करोति। आसियान्-भारत-शिखर-सम्मेलने द्विसहस्रतमस्य षड्विंशस्य त्रिंशत्-वर्षस्य आसियान्-भारत-कार्य-योजनाम् अन्तर्भाव्य व्यापक-रणनीतिक-सन्धेः कार्यान्वयने जातायाः प्रगतेः समीक्षा भविष्यति, अथ च पारस्परिक सहयोगस्य आगामि-दिशा निर्धारयिष्यते। इतश्च फिलीपीन्स्-देशस्य मनीला-नगरे आसियान्-शिखर सम्मेलनस्य द्वितीयः दिवसः प्रचलति, यत्र दक्षिण-पूर्व-एशियायी-नेतारः क्षेत्रीय-सहयोगस्य, शान्तेः, सुरक्षायाः, आर्थिक विकासस्य च विषये गहनं विमर्शं कुर्वन्ति।

## सिन्दूराभियानेन स्वदेशी-शस्त्रास्त्रैः सह योद्धुं भारतीय-सशस्त्र-बलानां अदम्य-क्षमता प्रदर्शिता - प्रमुख-रक्षाध्यक्षः

प्रमुख-रक्षाध्यक्षः जनरल् एन्.एस्. राजा सुब्रमणिः प्रतिपादितवान् यत् गतवर्षे पहलगाम आतङ्कवादि-आक्रमणानन्तरं सञ्चालितेन सिन्दूराभियानेन इदं सुस्पष्टं प्रदर्शितं यत् भारतीय-सशस्त्र बलानि स्वदेशी-शस्त्रास्त्रैः सह योद्धुं पूर्ण-सामर्थ्यं धारयन्ति। नव-देहल्यां एकायाः निजी-वार्ता-संस्थायाः पक्षतः आयोजितं राष्ट्रिय-सुरक्षा-शिखर सम्मेलनम् सम्बोधयन् सः इदं वक्तव्यं दत्तवान्। प्रमुख-रक्षाध्यक्षः अवोचत् यत् सिन्दूराभियानेन त्रयाणां सैन्य-अङ्गानां मध्ये संयुक्त-योजनायाः अथ च बहु-क्षेत्रीय-एकीकरणस्य एकम् अत्युत्तमम् उदाहरणं वर्तते।

## भारतेन आगामिषु चतुर्षु वर्षेषु विश्वस्य शीर्ष-पोत-निर्माण-राष्ट्रेषु स्थानं प्राप्तुं लक्ष्यं निर्धारितम्



पत्तन-पोतपरिवहन-जलमार्ग-मन्त्री सर्वानन्द-सोनोवालः अवोचत् यत् भारतेन त्रिंशदधिक-द्विसहस्रतमं यावत् विश्वस्य शीर्ष-दशसु पोत-निर्माण-राष्ट्रेषु अथ च सप्तत्यत्त्वारिंशदधिक-द्विसहस्रतमवर्षं यावत् शीर्ष-पञ्चसु राष्ट्रेषु स्थानं प्राप्तुं महत्वाकाङ्क्षि-लक्ष्यं निर्धारितम् । मन्त्री नवदेहल्याम् आयोजितं षड्विंशत्यधिक-द्विसहस्रतमस्य भारत-पोतनिर्माण-निवेश-सम्मेलनम् सम्बोधयन् इदं वक्तव्यं दत्तवान्। तेन सूचितं यत् देशस्य सक्रिय-आदेश-शृङ्खलायां एक-दशमलव-सप्तचत्त्वारिंशत् बिलियनडॉलरमितात् अधिक-मूल्यानां सार्ध-शतात् अधिक-जलपोतानां निर्माण-आदेशाः सन्ति। श्रीसोनोवालः अकथयत् यत् भारतं तादृशीं वैश्विक सन्धिम् अन्विष्यति या देशे निवेशं, कौशलं, प्रौद्योगिकीयम् अनुसन्धानं, दीर्घकालिक आदेशान् च आनयति। सः प्रतिपादितवान् यत् भारते वैश्विक समुदायस्य विश्वासः पूर्वमेव निरन्तरं वर्धमानः वर्तते।

## अन्ताराष्ट्रिय-क्रिकेट्-परिषदा जय-शाहः द्वितीय-कार्यकालाय निर्विरोधं परिषद्-अध्यक्ष-पदे पुनः निर्वाचितः



अन्ताराष्ट्रिय-क्रिकेट्-परिषदा उद्घोषितं यत् क्रिकेट्-क्रीडायाः एकस्मिन् निर्णायक-क्षणे निरन्तरतां सुनिश्चेतुं जय-शाहः द्वितीय-द्विवर्षीय-कार्यकालाय निर्विरोधं परिषद्-अध्यक्ष-पदे पुनः नियुक्तः । तस्य अस्याः पुनर्नियुक्तेः पुष्टिः इण्डोनेशिया-देशस्य बाली-नगरे समाप्तानाम् आई.सी.सी. निदेशक-मण्डलस्य उपवेशनानां काले अभवत्। अष्टत्रिंशत्-वर्षीयः जय-शाहः, यः पूर्व भारतीय-क्रिकेट्-नियन्त्रण-मण्डलस्य सचिव-पदे कार्यं कृतवान्, सः चतुर्विंशत्यधि-द्विसहस्रतमवर्षस्य दिसम्बर-मासे अन्ताराष्ट्रिय-क्रिकेट्-नियामक-संस्थायाः कार्यभारं गृहीतवान् ।

## बङ्गालस्य उपत्यकायां स्थितं गभीर-अवदाब-क्षेत्रं चक्रवातरुपेण घनीभूय परिवर्तितुं शक्यते



भारतीय-ऋतु-विज्ञान-विभागेन प्रतिपादितं यत् दक्षिण-पूर्व-अथ-तत्संलग्न-दक्षिण-पश्चिम बङ्गालस्य उपत्यकायां स्थितं गभीर-अवदाब-क्षेत्रम् उत्तर-उत्तर-पश्चिम-दिशि अग्रेसरत् दक्षिण-बङ्गालस्य उपत्यकायाः मध्य-भागेषु तत्संलग्न-पश्चिम-मध्य-बङ्गालस्यउपत्यकायां च चक्रवातरुपेण घनीभूय परिवर्तिष्यते। तदनन्तरं अद्य सायंकालं यावत् इयं पश्चिम-मध्य-बङ्गालस्य उपत्यकायां एकास्यां भीषण-चक्रवातरुपेण तीव्रतां प्राप्स्यति। ऋतु-विभागेन सूचितं यत् अयं अधिकतीव्रतां प्राप्य उत्तर-पश्चिम-दिशि गच्छन् शुक्रवासरे मध्याह्न यावत् अति-भीषण-चक्रवाती-रूपेण नेल्लोर-तुनी-क्षेत्रयोः मध्ये आन्ध्रप्रदेश-यानम-तटम् उल्लङ्घयिष्यति। ऋतु-विभागेन मत्स्याजीविनः शुक्रवासरं यावत् अण्डमान-सागरे, दक्षिण-पूर्व-बङ्गालोपत्यकायां, अथ अण्डमान-निकोबार्-द्वीपसमूहस्य तटवर्ती-समीपवर्ती-समुद्र-क्षेत्रेषु न गन्तुं परामर्शो दत्तः। ऋतु-संस्थया उक्तं यत् अण्डमान-निकोबार्-द्वीपसमूहे आगामिषु त्रि-चतुर्षु दिनेषु मेघ गर्जनैः विद्युत्पातेन च सह वृष्टि-स्थितिः निरन्तरं भविष्यति। ऋतु-विभागेन श्वः यावत् उत्तरप्रदेशे सघन-कुज्झटिकायाः स्थितेः अपि पूर्वानुमानं विहितम्। इतश्च नव-दिल्ल्यां राष्ट्रिय-राजधानी-क्षेत्रे च वायु-गुणवत्ता दोषपूर्ण-श्रेण्यां वर्तते। केन्द्रीय-प्रदूषण नियन्त्रण-मण्डलस्य अनुसारम् अद्य अपराह्णे एक-वादनं यावत् दिल्ल्याः वायु-गुणवत्ता-सूचकाङ्कः सार्ध-द्विशतं पञ्जीकृतः।

## गतदिवसे राष्ट्रिय-पत्रकारिता-दिवसः आचरितः



समग्र देशे राष्ट्रिय-पत्रकारिता-दिवसः आचरितः। अयं दिवसः षष्ट्यधिक एकोनविंशतितमस्य वर्षस्य अस्मिन्नेव दिने भारतीय-पत्रकारिता-परिषदः स्थापनायाः स्मरणार्थम् आयोज्यते। अस्मिन्नवसरे नवदेहल्यां भारतीय-पत्रकारिता-परिषदा आयोजिते विशेष-समारोहे सूचना-प्रसारण-मन्त्री अश्विनी वैष्णवः सम्मिलितः अभवत्। कार्यक्रमं सम्बोधयन् मन्त्री सामाजिक-माध्यमानां नियमनस्य विषये पर्याप्त-उत्तरदायित्वाभावस्य उपरि गभीरां चिन्तां प्रकटितवान्, अथ च नागरिकाणां परिवादानां निवारणाय प्रभावी-प्रणालीभिः तेषां सशक्तीकरणस्य आवश्यकतायां विशेषं बलं दत्तवान्। सः मिथ्या-समाचारस्य प्रसारः, छायाचित्राणां दुरुपयोगः, भ्रामक-विज्ञापनानि, अथ च कृत्रिम बुद्धिमत्ता-जनित-डीपफेक् इत्यस्य वर्धमानं सङ्कटम् अन्तर्भाव्य अनेक-समाह्वानानां विषये अपि प्रकाशं दत्तवान्।अस्मिन् समारोहे भारतीय- प्रेस- परिषदि अध्यक्षपदासीनया रञ्जनाप्रकाश देसाईवर्यया, सूचनाप्रसारण-मन्त्रालयस्य सचिवेन चञ्चलकुमारवर्येण, भारतीयजनतापक्षस्य सांसदेन सुधांशु-त्रिवेदिवर्येण, प्रसिद्धेन वरिष्ठपत्रकारेण रजतशर्मावर्येण सह अनेकैः गणमान्यैः अतिथिभिः सहभागिता कृता। राष्ट्रिय-प्रेसदिवसस्य अस्य समारोहे पत्रकारितायाः महत्त्वं, लोकतन्त्रे पत्रकाराणां भूमिका, समाजे सूचनाप्रसारण- माध्यमानां योगदानं विशेषतया स्मारितम्।

## बेलारूसदेशस्य विदेशमन्त्री मैक्सिम रिज़ेनकोवः चतुर्दिवसीयभारतीययात्रायै नवदेहलीं सम्प्राप्तः



हिमसंस्कृतवार्ताः- नवदेहली। बेलारूसदेशस्य विदेशमन्त्री मैक्सिम रिज़ेनकोवः चतुर्दिवसीय-भारतीययात्रायाः कृते भारतस्य राजधानीं नवदेहलीं सम्प्राप्तवान्। अद्य सः भारतस्य वाणिज्य- उद्योगविभागस्य राज्यमन्त्री जितिनप्रसादेन सह व्यापारस्य, अर्थव्यवस्थायाः, विज्ञानस्य, प्रौद्योगिक्याः, संस्कृतेः क्षेत्रेषु परस्परसहयोगस्य संवर्धनाय आयोजितायाः भारत- बेलारूस- अन्तःसर्वकारीययोगस्य द्वादशोपवेशनस्य सहाध्यक्षतां करिष्यति। अस्मिन् उपवेशने भारत- बेलारूसयोः द्विपक्षीयसम्बन्धानां सुदृढीकरणं, आर्थिक-व्यापारिक- सहयोगस्य विस्तारः, वैज्ञानिक-प्रौद्योगिकीयक्षेत्रेषु पारस्परिक- सहभागिता च प्रमुखतया चर्चायाः विषयाः भविष्यन्ति। तदतिरिक्तं, श्वः बेलारूसदेशस्य विदेशमन्त्री मैक्सिम रिज़ेनकोवः भारतस्य विदेशराज्यमन्त्रिणा कीर्तिवर्धनसिंहेन सह अपि द्विपक्षीयवार्तां करिष्यति। अस्याः वार्तायाः माध्यमेन उभयोः देशयोः मैत्रीपूर्णसम्बन्धानां विकासाय, विविधक्षेत्रेषु सहयोगस्य नवीनावसराणां अन्वेषणाय विचारविनिमयः भविष्यति। भारत- बेलारूसयोः परस्परसहयोगस्य विस्ताराय एषा यात्रा महत्त्वपूर्णा भविष्यति।



# भारतीयांशविपण्याः

## सकारात्मकवृद्धिः, सेन्सेक्स-निफ्टी- सूचकाङ्कयोः वर्धनम्

**हिमसंस्कृतवार्ताः- डॉ विमलेश झा,** मुंबई, १६ नवम्बर २०२६ भारतीयांशविपण्यां सकारात्मकं वातावरणं दृष्टम्। सप्ताहस्य प्रथमव्यवसायदिवसे प्रमुखेषु अंशसूचकाङ्केषु वृद्धिः अभवत्। विदेशीय-संस्थागत- निवेशकानां क्रयविक्रयगतिविधिषु क्रयणस्य प्राबल्यं, सूचना-प्रौद्योगिकीक्षेत्रस्य प्रमुखसंयन्त्राणां अंशेषु निवेशकानां रुचिः विपण्याः उत्साहवर्धने महत्त्वपूर्णं योगदानम् अकरोत्। मुम्बईशेयरविपण्याः प्रमुखसूचकाङ्कः सेन्सेक्सः ५१२.३४ अङ्कैः अर्थात् ०.६२ प्रतिशतं वर्धित्वा ८२,१०४.७९ अङ्केषु स्थिरः अभवत्। राष्ट्रियशेयरविपण्याः निफ्टी-५० सूचकाङ्कः १४६.८० अङ्कैः अर्थात् ०.५८ प्रतिशतं वर्धित्वा २५,२९१.१० अङ्केषु समाप्तः अभवत्। विदेशीयमुद्राविपण्यां भारतीयमुद्रा अपि सुदृढा अभवत्। विदेशीय-विभागीयनिवेशकानां क्रयणप्रवृत्त्या विपण्यां सकारात्मकः प्रभावः अभवत्। विशेषतः आईटीसी, टाटा कन्सल्टेन्सी सर्विसेज तथा सूचना-प्रौद्योगिकीक्षेत्रसम्बद्धानां संयन्त्राणां अंशेषु पर्याप्तं क्रयणं दृष्टम्। एतेन प्रमुखसूचकाङ्कानां वृद्धौ साहाय्यं प्राप्तम्। मैक्स हेल्थकेयर इति स्वास्थ्यसेवासम्बद्धायाः संयन्त्रस्य शेयरमूल्यं प्रायः षड् प्रतिशतं वर्धितम्। आईटीसी तथा नेस्ले इत्यनयोः संयन्त्रयोः अंशेषु अपि वृद्धिः अभवत्। एमवी इलेक्ट्रोसिस्टम्स इति संस्था अपि अद्य विशेषतया चर्चायाम् आसीत्। यद्यपि प्रमुखसंयन्त्राणाम् अंशेषु वृद्धिः दृष्टा, तथापि मध्यममूलधनविपण्यां, लघुमूलधनविपण्यां द्वितीयदिने अपि विक्रयप्रभावः अवर्तत। समग्रतया अद्य भारतीयांशविपण्याम् उत्साहवर्धकं वातावरणम् आसीत्। सेन्सेक्स- निफ्टी- सूचकाङ्कयोः वृद्धिः, बैंकनिफ्टी- सूचकाङ्कस्य नूतनः विक्रमस्तरः, भारतीयमुद्रायाः सुदृढता निवेशकानां कृते सकारात्मकानि संकेतानि आसन्।

# पञ्चवर्षपर्यन्तम् अस्थायिनियुक्तिः,

## नियमितीकरिष्यन्ते सहायक-परिचारिकाः,

## स्वास्थ्यमन्त्रिणा विधानसभायां दत्ता सूचना





**हिमसंस्कृतवार्ताः- धर्मशाला।** हिमाचलप्रदेशे सहायक-परिचारिकाणां (स्टाफ नर्स) नियुक्तिम् अधिकृत्य सर्वकारेण स्थितिः स्पष्टीकृता अस्ति। नियुक्तिनीतेः अन्तर्गततया नियुज्यमानाः सहायक-परिचारिकाः पञ्चवर्षाणाम् अवधये अस्थायि-आधारेण पदस्थापयिष्यन्ते। अस्याः अवधेः अनन्तरं तासां सेवानां नियमितीकरणाय नियुक्तिनीतौ किमपि प्राविधानं नास्ति। स्वास्थ्यमन्त्री धनीरामशाण्डिलः इमां सूचनां भाजपा-विधायकस्य सुधीरशर्मणः पक्षतः पृष्टस्य प्रश्नस्य लिखितोत्तरे दत्तवान्।

मन्त्रिणा कथितं यत् गतेषु त्रिषु वर्षेषु १ नवम्बर् २०२६ दिनाङ्कं यावत् राज्य-चयन-आयोगस्य माध्यमेन सप्तदशाधिकशतम् (११७) अभ्यर्थिभ्यः सहायक-परिचारिका-पदेषु नियुक्तिपत्राणि निर्गमितानि सन्ति। सहायक-परिचारिकाणां नियुक्तिनीतिः स्वास्थ्यविभागेन ६ नवम्बर् २०२५ दिनाङ्के निर्गमिता आसीत्। अस्याः अन्तर्गततया पञ्चवर्षाणाम् अवधये अस्थायिनियुक्तीः कर्तुं प्राविधानं वर्तते। विभागेन स्पष्टीकृतं यद् एतासां सेवानां नियमितीकरणाय नीतौ किमपि प्राविधानं नास्ति। सहायक- परिचारिकाणाम् अस्थायिनियुक्ति- सम्बद्धा एका याचिका (CWP संख्या १६३३५/२६) हिमाचलप्रदेश-उच्चन्यायालये विचाराधीना वर्तते। एतदतिरिच्य विविधनियुक्तिनीतिभिः सम्बद्धा 'सीडब्ल्यूपी' (CWP) संख्या ७४७४/२२ अपि न्यायालये लम्बिता अस्ति, यस्यां सहायक- परिचारिका-नियुक्तिनीतेः प्रकरणमपि समाविष्टम् अस्ति।

**वर्षद्वये एकत्रिंशदधिक-षट्शतं (६३१) जनेभ्यः वन- अधिकार-पट्टिकाः**

प्रदेशे 'वन-अधिकार-अधिनियमस्य' (FRA) अन्तर्गततया गतेषु द्वयोः वर्षयोः एकत्रिंशदधिक- षट्शतं (६३१) पात्रजनेभ्यः व्यक्तिगत-भूमिपट्टिकाः (पट्टे) स्वीकृताः सन्ति। इमां सूचनां राजस्वमन्त्री विधानसभायां शाहपुरस्य विधायकस्य केवलसिंहपठानिया-महोदयस्य पक्षतः पृष्टस्य प्रश्नस्य लिखितोत्तरे दत्तवान्। विधायकः केवलसिंहपठानिया सर्वकारात् प्रदेशे वन- अधिकार- अधिनियमस्य अन्तर्गततया प्रदत्तानां पट्टिकानां संख्यया सह शाहपुर-विधानसभाक्षेत्रस्य कजलोट-जमली-ग्रामयोः गृहहीनानां जनानां कृते भूमिपट्टिका-प्रदानस्य स्थितिं समयसीमां च अधिकृत्य अपि प्रश्नं पृष्टवान् आसीत्।

सर्वकारेण कजलोट-ग्रामस्य प्रकरणेषु स्थितिं स्पष्टीकुर्वता निगदितं यत् काङ्गड़ा-उपायुक्तस्य प्रतिवेदनानुसारम् अत्रत्याः षट् अभ्यर्थनाः 'महाल- सभातः' प्राप्ताः आसन्। यद्यपि अन्वेषणकाले एतेषु अभ्यर्थनेषु काश्चित् त्रुटयः प्राप्ताः, याः दूरीकर्तुं सम्बद्धाः अभ्यर्थनाः प्रत्यावर्तिताः (वापस प्रेषिताः) सन्ति। जमली-ग्रामस्य जनानाम् अभ्यर्थनाः अधिकृत्य सर्वकारेण कथितं यद् उपमण्डलस्तरीय-समितेः धर्मशालायाः कार्यालये अधुनावधि काऽपि अभ्यर्थना न प्राप्ता अस्ति।



# हिमाचलप्रदेशे मार्गदुर्घटनाः

## ३९ प्रतिशतं न्यूनाः

हिमसंस्कृतवार्ताः- शिमला। हिमाचलप्रदेशे गतेषु दशसु वर्षेषु मार्गदुर्घटनानां कुलसंख्यायां प्रायः ३९ प्रतिशतं ह्रासः जातः, किन्तु तासु प्राणत्यागिनाम् अनुपातं निरन्तरं वर्धते। २०१६ तमे वर्षे प्रति शतदुर्घटनासु ३६.९ जनाः मृताः आसन्, यत् २०२५ तमे वर्षे ४१.५ तथा २०२६ तमस्य वर्षस्य सितम्बर-मासस्य ३० दिनाङ्कं यावत् ४४.९ अभवत्। प्रदेशस्य पुलिस- आरक्षक- विभागस्य २०२६ तमस्य वर्षस्य सितम्बर- मासपर्यन्तस्य संख्यायाः सूचयन्ति यत् दुर्घटनासु न्यूनीकरणस्य गतिः मृत्युषु ह्रासात् अधिका अस्ति। २०१६ तमात् वर्षात् २०२५ तमं वर्षम् यावत् दुर्घटनासु यत्र ३९ प्रतिशतस्य ह्रासः अभिलेखतः जातः, तत्रैव कुलमृत्युषु केवलं ३१ प्रतिशतस्य एव ह्रासः जातः। प्रदेशे मार्गदुर्घटनाः न्यूनाः अभवन् चेदपि मृत्युदरस्य ४४.९ प्रतिशतं प्राप्नुतिः चिन्ताजनका अस्ति। अधुना मार्गसुरक्षायाः रणनीतौ केवलं दुर्घटनानां संख्यां न्यूनीकर्तुम् अपितु तासां गाम्भीर्यं न्यूनीकर्तुम् आघातिभ्यः समये चिकित्सां प्रदाय प्राणरक्षणाय विशेषं ध्यानं दातव्यं भविष्यति।

मार्गदुर्घटनाः तासु च जायमानाः मृत्युकः न्यूनीकर्तुं केवलं यातायात-नियमानां पालनं कारयितुं पर्याप्तं नास्ति। कृष्ण-स्थानानां चिह्नितं कृत्वा तेषु संशोधनं, तीव्रगत्या मद्यपानेन च वाहनचालकानाम् उपरि कठोरता, दुर्घटनानन्तरम् आघातिभ्यः समये चिकित्सा-सुविधायाः उपलभ्यीकरणे विशेषं ध्यानं दातव्यम्।

**- अशोक तिवारी,**
**पुलिस महानिदेशक (डीजीपी),**
**हिमाचल प्रदेशः**

# पूर्व-भाजपा-सर्वकारस्य निर्णयानाम् उद्घाटनं भविष्यति! सुक्खू-सर्वकारः

## शीघ्रमेव आनेष्यति श्वेतपत्रं, समितिः निर्मिता




**हिमसंस्कृतवार्ताः- धर्मशाला।** हिमाचलप्रदेश-विधानसभायाः शीतकालीन- अधिवेशनस्य शुभारम्भात् पूर्वं तपोवन- विधानसभापरिसरे आयोजितायाः काङ्ग्रेस- विधायकदलस्य गोष्ठ्याः अनन्तरं प्रदेशस्य राजनीतिः उत्तप्ता सञ्जाता अस्ति। गोष्ठ्याः उपरान्तं मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः घोषणाम् अकरोत् यत् प्रदेशसर्वकारः पूर्व- भाजपा- सर्वकारस्य कार्यकाले सञ्जाताः कथिताः अनियमितताः भ्रष्टाचारस्य च प्रकरणानि उद्घाटयितुं शीघ्रमेव एकं 'श्वेतपत्रम्' आनेष्यति। मुख्यमन्त्री अवदत् यत् पूर्वतनसर्वकारस्य निर्णयानां सत्यता तथ्यैः सह जनतायाः न्यायालये उपस्थापयिष्यते।

मुख्यमन्त्री सुक्खू माध्यमप्रतिनिधीनां (मीडिया) समक्षं गम्भीरान् आरोपान् आरोपयन् प्रावोचत् यत् पूर्व-भाजपा-शासनकाले 'कस्टमाइज्ड-पैकेज' इत्यस्य नाम्नि औद्योगिकक्षेत्रे नालागढ़-बद्दी-मध्ये प्रायः पञ्चसहस्रं (५,०००) बीघा-परिमिता भूमिः केवलम् एककोटिरूप्यकेषु नवनवतिवर्षपर्यन्तं (९९ वर्षाणि यावत्) पट्टिकायां (लीज-आधारे) प्रदत्ता आसीत्, तदपि विना किमपि पञ्जीकरणम्। मुख्यमन्त्री अवदत् यद् ईदृशानि बहूनि अन्यानि सन्दिग्धप्रकरणानि अस्मिन् श्वेतपत्रे समाविष्टानि क्रियन्ते, शीघ्रमेव अस्य सम्पूर्णं प्रतिवेदनं (रिपोर्ट्) सार्वजनिकं विधास्यते। इदं प्रलेखं सज्जीकर्तुम् उपमुख्यमन्त्रिणः मुकेश अग्निहोत्रिणः नेतृत्वे अष्टसदस्यीयसमितेः सङ्घटनं कृतम् अस्ति, यस्यां हर्षवर्धनचौहानः, राजेशधर्माणी, विक्रमादित्यसिंहः सहिताः अन्ये च वरिष्ठनेतारः समाविष्टाः सन्ति। इतः पूर्वं विधायकदलस्य गोष्ठ्याः आरम्भे शोकप्रस्तावं पारितं कृत्वा दिवङ्गताय रामपुरस्य विधायकाय नन्दलाल-महोदयाय भावपूर्णा श्रद्धाञ्जलिः समर्पिता, सर्वैः विधायकैः निमेषद्वयं यावत् मौनं धृत्वा तस्य आत्मनः शान्त्यै प्रार्थना कृता। दिवङ्गतनेतारं स्मरन् मुख्यमन्त्री सुक्खूः अवदत् यत् तस्य सम्पूर्णं राजनैतिकजीवनम् अतीव स्वच्छं, सत्यनिष्ठं, सरलतापूर्णं च आसीत्। सः प्रावोचत् यत् जनसेवां सङ्घटनं च प्रति तस्य अमूल्यं योगदानं काङ्ग्रेस-दलं विधायकदलं च सदैव स्मरिष्यतः।

**काङ्ग्रेस-दलम् एकीभूय योत्स्यते सङ्ग्रामम्**

गोष्ठ्याः अन्तराले काङ्ग्रेसदलस्य वरिष्ठनेत्र्याः सोनियागान्धी- महोदयायाः 'बिलॉङ्गिङ्ग' नामकपुस्तकस्य औपचारिकं विमोचनमपि कृतम्। अस्मिन् अवसरे काङ्ग्रेसदलस्य प्रदेशप्रभारी रजनीपाटिल महोदया अवदत् यत् तया अस्य पुस्तकस्य एका प्रतिः तिब्बतीयधर्मगुरवे दलाईलामा महोदयाय अपि उपहारीकृता अस्ति। पाटिल-महोदया अकथयत् यत् प्रदेशे काङ्ग्रेसदलं पूर्णतया एकीभूय स्वकीयसङ्ग्रामं योद्धुं सज्जं वर्तते, सर्वैः नेतृभिः विजयं प्राप्य प्रत्यागन्तुं सङ्कल्पः गृहीतः। गोष्ठ्याम् आगामि- विधानसभा-अधिवेशनस्य रणनीतौ प्रदेशस्य च वर्तमान-राजनैतिक- परिस्थितिषु अपि विस्तरेण चर्चा विहिता

### एकावधिः समाधानयोजनायाः अवधिः वर्धिता आवेदनस्य अन्तिमतिथिः दिसम्बरमासस्य १४ दिनाङ्कः, निर्धारितधनराशेः निक्षेपस्य अन्तिमतिथिः जनवरीमासस्य १५ दिनाङ्कः

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ। उत्तरप्रदेशस्य नगरविकासमन्त्री ए. के. शर्मा जनसामान्यस्य आग्रहं, योजनायाः लाभार्थिनां च वर्धमानां संख्यां दृष्ट्वा एकमुश्तसमाधानयोजनायाः अवधिविस्तारार्थं वरिष्ठाधिकारिभ्यः निर्देशान् प्रदत्तवान् आसीत्। तस्य निर्देशानुसारं नगरविकासविभागेन सञ्चाल्यमानायाः एकमुश्त- समाधानयोजनायाः अवधिः वर्धिता अस्ति। गृहकरस्य, जलकरस्य, मलनिस्सारणकरस्य, अन्येषां कराणां देयधनराशिषु राहतं प्रदातुं सञ्चाल्यमानायाः अस्याः योजनायाः अन्तर्गतं आवेदनस्य अन्तिमतिथिः अधुना २०२६ तमस्य वर्षस्य दिसम्बरमासस्य १४ दिनाङ्कः निर्धारितः अस्ति। निर्धारितधनराशेः निक्षेपस्य अन्तिमतिथिः २०२७ तमस्य वर्षस्य जनवरीमासस्य १५ दिनाङ्कपर्यन्तं विस्तारितः अस्ति। ऊर्जामन्त्री ए. के. शर्मा नागरिकान् आहूतवान् यत् ते विलम्बं विना शीघ्रमेव योजनायाम् आवेदनं कुर्वन्तु तथा निर्धारितसमयसीमायां देयधनराशिं निक्षिप्य अस्याः योजनायाः लाभं प्राप्नुवन्तु। मन्त्रिणा सर्वेभ्यः नागरिकेभ्यः योजनायाः लाभं स्वीकर्तुं शुभकामनाः प्रदत्ताः।



# काङ्ग्ड़ा-मण्डलस्य

## परागपुरं नूतनम् उपमण्डलं निर्मातुं निर्णयाय

## उच्चन्यायालये आह्वानम्, सर्वकाराय सूचनापत्रम्

हिमसंस्कृतवार्ताः-

शिमला। हिमाचलप्रदेशसर्वकारस्य काङ्गड़ा-मण्डले परागपुरं नूतनं नागरिक-उपमण्डलं निर्मातुं निर्णयाय उच्चन्यायालये आह्वानं दत्तम् अस्ति। इदम् आह्वानं हिमाचलप्रदेश-उच्चन्यायालये एकस्याः जनहितयाचिकायाः माध्यमेन प्रदत्तम् अस्ति। उच्चन्यायालयेन अस्यां याचिकायां श्रवणं कुर्वता राज्यसर्वकाराय केन्द्रसर्वकाराय च सूचनापत्रं निर्गमितम् अस्ति। न्यायालयेन उभाभ्यां सर्वकाराभ्याम् अस्मिन् प्रकरणे उत्तरं याचितम्। अयम् आदेशः बलदेवराजेन अन्यैश्च प्रस्तुतायां याचिकायां दत्तः अस्ति। प्रकरणस्य अग्रिमं श्रवणं २१ दिसम्बर दिनाङ्के निर्धारितं कृतं वर्तते।

याचिकाकर्तारः न्यायालयम् अवदन् यत् प्रदेशसर्वकारेण २३ सितम्बर २०२६ दिनाङ्के एका अधिसूचना निर्गमिता आसीत्। अस्याः अधिसूचनायाः अन्तर्गततया काङ्गड़ा-मण्डले नूतनम् उपमण्डलं परागपुरं निर्मितम् अस्ति। याचिकाकर्तृणां तर्कः अस्ति यद् अयं निर्णयः जनगणनानियमानाम् उल्लङ्घनं करोति।

**जनगणनानियमानाम् उल्लङ्घनम्**

याचिकायां 'जनगणना-नियमावली, १९९०' इत्यस्य नियमस्य ८ (iv) इत्यस्य सन्दर्भः दत्तः अस्ति। अस्य नियमस्य अनुसारेण, जनगणनायाः सन्दर्भतिथेः एकवर्षात् पूर्वम् आरभ्य जनगणनायाः पूर्णतापर्यन्तं प्रशासनिकसीमाः स्थिराः स्थाप्यन्ते। एतासु मण्डलानाम्, उपमण्डलानाम्, उपनगरप्रभृतीनां च सीमाः समाविष्टाः सन्ति। एताः सीमाः अस्याम् अवधौ परिवर्तयितुं न शक्यन्ते।

**प्रशासनिकसीमाः स्थिराः**

न्यायालयस्य अभिलेखे केन्द्रसर्वकारस्य १६ जून, २०२५ दिनाङ्कस्य अधिसूचना उपस्थापिता। अस्याम् अधिसूचनायां जनगणनायाः सन्दर्भतिथिः १ मार्च, २०२७ निर्धारिता आसीत्। याचिकाकर्तारः तर्कं दत्तवन्तः यद् अस्याः गणनायाः अनुसारेण १ मार्च, २०२६ दिनाङ्कात् १ मार्च, २०२७ दिनाङ्कं यावत् प्रशासनिकसीमाः स्थिराः आसन्। अस्याम् अवधौ नूतनम् उपमण्डलं निर्मातुं जनगणनानियमानां विरुद्धम् अस्ति।

# हिमाचल-विधानसभायाः शीतकालीन- अधिवेशनम्

## शोकोद्गारात् परं सदनस्य कार्यविधिः मङ्गलवासरं यावत् स्थगिता

**हिमसंस्कृतवार्ताः- धर्मशाला।** हिमाचलप्रदेश-विधानसभायाः षड्दिवसीयं शीतकालीन- अधिवेशनं सोमवासरे, १६ नवम्बर- दिनाङ्के काङ्गड़ामण्डलस्य तपोवनस्थिते विधानसभा- परिसरे आरब्धम्। इदं चतुर्दश्याः (१४) विधानसभायाः त्रयोदशम् (१३) अधिवेशनम् अस्ति, यद् २१ नवम्बर दिनाङ्कं यावत् चलिष्यति। प्रथमदिवसस्य कार्यविधिः अपराह्णे द्विवादने (२:००) प्रारब्धा। सदनस्य शुभारम्भः दिवङ्गतानां जनप्रतिनिधीनां प्रति शोकसंवेदनानां प्रकटीकरणेन सह अभवत्। शोकप्रस्तावस्य अन्तराले तस्मिन् समये सदने भिन्नप्रकारस्य स्थितिः उत्पन्ना, यदा विधानसभाध्यक्षः कुलदीपसिंहपठानिया काङ्ग्रेस-प्रदेशाध्यक्षं विधायकं च विनयकुमारं स्वकीये आसने उपवेष्टुम् अवदत्। इतः पूर्वं चुराह-क्षेत्रस्य भाजपा-विधायकः हंसराजः अपि सङ्केतेन अस्मिन् विषये आपत्तिं प्रकटितवान् आसीत्। अनन्तरं शोकप्रस्तावे स्वकीयान् विचारान् स्थापयता हंसराजेन अस्मिन् घटनाक्रमे आपत्तिः पञ्जीकारिता। सः अवदत् यत् यदा सदने शोकसंवेदनाः प्रकाश्यन्ते, तदा सर्वैः सदस्यैः सदनस्य गरिम्णः परम्पराणां च ध्यानं धारणीयम्। तस्यानुसारेण, विनयकुमारेण तस्मिन् समये स्वकीये आसने उपवेष्टव्यम् आसीत्।



### दिवङ्गतविधायकाय नन्दलालाय समर्पिता श्रद्धाञ्जलिः

सदने विधायकस्य नन्दलालस्य निधने शोकः प्रकटितः। सदस्यैः तस्य राजनैतिकं सार्वजनिकं च जीवनं स्मरद्भिः श्रद्धांजलिः अर्पिता। प्रथमे दिने पूर्वमन्त्रिणः मेजर विजयसिंह- मनकोटिया-महोदयस्य निधनेऽपि शोकसंवेदनाः प्रकटयितुं कार्यक्रमः आसीत्। शोकप्रस्तावस्य शोकसंवेदनानां च क्रमः प्रायः सपादहोरां यावत् प्रचलितः। अस्मिन् अन्तराले सदनस्य वातावरणं गम्भीरं भावुकं च आसीत्।

### सदनस्य कार्यविधिः मङ्गल-वासरं यावत् स्थगिता

शोकसंवेदनानां पूर्णतायाः अनन्तरं विधानसभाध्यक्षः कुलदीपसिंहपठानिया सदनस्य परम्परायाः उल्लेखम् अकरोत्। सः दिवङ्गत- विधायकस्य नन्दलालस्य निधनकारणात् सदनस्य कार्यविधिम् अग्रिमदिनं यावत् स्थगयितुं घोषणाम् अकरोत्। अधुना विधानसभायाः अग्रिमम् उपवेशनं मङ्गलवासरे भविष्यति।

### अस्वस्थतायां सत्यामपि मया सह प्रवासे आसीत् नन्दलालः- सुक्खूः

मुख्यमन्त्री सुखविन्दरसिंहसुक्खूः अवदत् यत् रामपुर- विधानसभाक्षेत्रस्य विधायकः दिवङ्गतः नन्दलालः यदा रुग्णः आसीत्, तदा सः तस्य क्षेत्रस्य प्रवासे आसीत्। अस्मिन् अन्तराले तेन सः गृहे विश्रामं कर्तुम् उक्तः, किन्तु जनतां प्रति स्वकीयं दायित्वं निर्वहन् सः स्वास्थ्ये प्रतिकूले सत्यपि प्रवासे सहैव अतिष्ठत्। शोकोद्गारप्रस्तावस्य अन्तराले स्वकीयं वक्तव्यं ददता सुक्खू-महोदयेन दिवङ्गतः नन्दलालः मेजर-विजयसिंहमनकोटिया च स्मरद्भ्यां ताभ्यां श्रद्धांजलिः अर्पिता तथा तयोः उपलब्धीनां गणना कृता।

### स्नेहशीलः आसीत् नन्दलालः, निर्भीकतया वार्तां स्थापयति स्म मनकोटिया- जयरामठाकुरः

प्रतिपक्षनेता पूर्वमुख्यमन्त्री च जयरामठाकुरः दिवङ्गताय पूर्वविधायकाय नन्दलालाय पूर्वमन्त्रिणे मेजर विजयसिंह-मनकोटियामहोदयाय च श्रद्धांजलिम् अर्पितवान्। सः द्वयोः नेत्रोः निधने शोकं प्रकटयन् एतत् प्रदेशस्य सार्वजनिकाय राजनैतिकाय च जीवनाय अपूरणीयां क्षतिम् अवदत्। जयरामठाकुरः प्रावोचत् यत् दिवङ्गतः नन्दलालः पूर्वं देशसेवायां सहभागिताम् अनिर्वहत्, अनन्तरं च प्रदेशस्य सेवायाम् अवतरत्। दिवङ्गतः नन्दलालः विधानसभायां तस्याः बहिर्वा कदापि कस्यापि विरुद्धम् अपशब्दान् न अवदत्। सः प्रदेशस्य स्वक्षेत्रस्य च जनतायाः समस्यां प्रत्येकं मञ्चे उत्थापयति स्म। राजनैतिकदृष्ट्या तेन कदापि कस्यापि विरोधः न कृतः। जयरामठाकुरः अकथयत् यत् मेजर-विजयसिंहमनकोटिया व्यक्तित्वस्य धनी आसीत्; तस्य भिन्नः एव परिचयः आसीत्। सः भ्रष्टाचारं न सहते स्म तथा यदा तस्मिन् विषये वदति स्म, तदा सः स्वकीयं लाभालाभं न पश्यति स्म। सः अवदत् यत् यद्यपि मनकोटिया- महोदयस्य राजनैतिकजीवनम् उद्वेगपूर्णम् आसीत्, किन्तु तस्य उद्देश्यं प्रदेशस्य सेवां कर्तुम् आसीत्।

### उभाभ्यां नेतृभ्यां श्रेष्ठं कार्यं कृतम्- पठानिया

विधानसभाध्यक्षः कुलदीपसिंहपठानिया अपि उभाभ्यां दिवङ्गतनेतृभ्यां श्रद्धांजलिं प्रकटितवान्। सः अवदत् यत् उभाभ्यामेव नेतृभ्यां स्व-स्वक्षेत्रे श्रेष्ठतरं कार्यं कृतम् आसीत्। तेन शोकसन्तप्तपरिवारान् यावत् सदनस्य भावनाः प्रापयितुम् अपि वार्ता कथिता। शिक्षामन्त्री रोहितठाकुरः अवदत् यत् समग्रप्रदेशेन द्वौ सैनिकनेतारौ नष्टौ स्तः। विधायकः केवलसिंहपठानिया प्रावोचत् यत् मनकोटिया महोदयेन स्वक्षेत्रस्य विकासाय एकः कार्यमार्गः निर्मितः आसीत्, यम् अधुना सः अग्रे वर्धयति।

## बस्तीजनेषु मतदातृसंयोजनाभियानस्य विषये भाजपायाः सङ्गठनात्मकमहत्त्वपूर्णा सभा सम्पन्ना

**जिलाध्यक्षस्य विवेकानन्दमिश्रस्य अध्यक्षतायां सभा आयोजिता, पात्रनागरिकाणां मतदातृरूपेण पञ्जीकरणाय विशेषबलं प्रदत्तम्।**

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, बस्तीम्, १६ नवम्बर।

भारतीयजनतापक्षस्य बस्तीजनपदकार्यालये अद्य मतदातृसंयोजनाभियानस्य सन्दर्भे सङ्गठनात्मक- महत्त्वपूर्णा सभा सम्पन्ना। सभायाः अध्यक्षता भाजपायाः जनपदाध्यक्षः आदरणीयः विवेकानन्दमिश्रः कृतवान्। सभायाः मुख्यातिथिः गोरखपुरक्षेत्रस्य क्षेत्रीयमहामन्त्री, बस्तीजनपदस्य जनपदप्रभारी आदरणीयः डॉ. सत्येन्द्रसिंहः आसीत्। सभायां क्षेत्रीयमन्त्री वैभवपाण्डेयः अपि उपस्थितः आसीत्। तदतिरिक्तं जनपदस्य सर्वासां विधानसभानां प्रभारीणः, विविधमोर्चानां जनपदाध्यक्षाः, सूचनाप्रौद्योगिकीप्रकोष्ठस्य पदाधिकारिणः, विधानसभास्तरीयाः बीएलए-१ पदाधिकारिणः, सर्वासां विधानसभानां विस्तारकाः, जनपदमाध्यमप्रभारी अजयपालः, जनपदमहामन्त्री अमृतवर्मा च अन्ये वरिष्ठपदाधिकारिणः कार्यकर्तारश्च सभायाम् उपस्थिताः आसन्।

सभायां मतदातृसंयोजनाभियानस्य अन्तर्गतं सङ्गठनात्मक- कार्याणां, मतदातृसूच्याः सम्बन्धित- क्रियाकलापानाम्, अभियानस्य सुव्यवस्थितरूपेण सञ्चालनस्य विषये विस्तृतं विचारविमर्शः कृतः। अस्मिन् सन्दर्भे उपस्थितेभ्यः पदाधिकारिभ्यः आवश्यकाः निर्देशाः मार्गदर्शनं च प्रदत्तम्। मतदातृसूच्याः शुद्धीकरणं, योग्यनागरिकाणां मतदातृरूपेण पञ्जीकरणं, लोकतान्त्रिक-प्रक्रियायां प्रत्येकस्य योग्यनागरिकस्य सहभागितायाः सुनिश्चितीकरणम् अस्माकं सर्वेषां महत्त्वपूर्णं दायित्वम् अस्ति। एतदर्थं सर्वैः कार्यकर्तृभिः समन्वयेन उत्तरदायित्वेन च अभियानं सफलं कर्तुं संकल्पः कृतः।

# आगामी- विधानसभा-
# सामान्यनिर्वाचनम्- २०२७
## संवेदनशीलमतदानकेन्द्राणां
## चिह्नीकरणस्य तथ सुभेद्यताक्षेत्राणां
### मानचित्रणस्य प्रक्रिया प्रारब्धुम् निर्देशाः निर्गताः
## प्रत्येकं मतदातारं निर्भयवातावरणे मतदानस्य अवसरं प्रदातुं
### प्राथमिकता- मुख्यनिर्वाचनाधिकारी

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ, नवम्बरमासस्य १६ दिनाङ्कः, २०२६।

आगामिनि विधानसभासामान्यनिर्वाचने-२०२७ स्वतन्त्रतया, निष्पक्षतया, पारदर्शितया शान्तिपूर्णतया च निर्वाचनप्रक्रियां सम्पन्नं कारयितुम् उत्तरप्रदेशस्य मुख्यनिर्वाचनाधिकारिणा प्रदेशस्य सर्वेभ्यः पुलिसायुक्तेभ्यः, जनपद- निर्वाचनाधिकारिभ्यः, वरिष्ठपुलिसाधीक्षकेभ्यः तथा पुलिसाधीक्षकेभ्यः संवेदनशीलानां मतदानकेन्द्राणां चिह्नीकरणस्य, सुभेद्यताक्षेत्राणां मानचित्रणस्य प्रक्रिया प्रारब्धुं निर्देशाः प्रदत्ताः। भारतस्य निर्वाचनायोगेन निर्धारितानां मानदण्डानाम् अनुसारेण प्रत्येकस्मिन् विधानसभानिर्वाचनक्षेत्रे संवेदनशील- मतदानकेन्द्राणां गम्भीरतया सावधानतया च चिह्नीकरणं कर्तव्यमिति निर्देशितम्। एतदर्थम् आयोगेन सप्त प्रमुखाः मानदण्डाः निर्धारिताः सन्ति।तेषु वल्नरेबल-पॉकेट अथवा सुभेद्यक्षेत्रेषु स्थितानि मतदानकेन्द्राणि अपि अन्तर्भवन्ति, यत्र पूर्वनिर्वाचने नवतिप्रतिशतादधिकं मतदानं जातम् आसीत्, पञ्चसप्ततिप्रतिशतादधिकानि मतानि एकस्मै प्रत्याशिने प्राप्तानि आसन्, अथवा यत्र दशप्रतिशतादपि न्यूनं मतदानं जातम् आसीत्। एतदतिरिक्तं पूर्वेषु लोकसभानिर्वाचनेषु विधानसभा-निर्वाचनेषु च पुनर्मतदानस्य स्थितिः, मतदानप्रक्रियायाम् अनियमितताः, मतदानकेन्द्रस्य बलात् अधिग्रहणस्य घटनाः, अनुपस्थितानां स्थानान्तरितानां मृतानां च मतदातृणां प्रतिशतं विधानसभाक्षेत्रस्य औसतप्रतिशतादधिकं भवितुम्, तथा सम्बन्धितक्षेत्रे असामान्या विधिव्यवस्थास्थितिः अपि संवेदनशील- मतदानकेन्द्राणां चिह्नीकरणस्य प्रमुखाः आधाराः भविष्यन्ति।सुभेद्यताक्षेत्राणां मानचित्रणस्य मुख्योद्देश्यं तादृशानां क्षेत्राणां मतदातृणां च अभिज्ञानं करणम् अस्ति, यत्र कश्चन व्यक्तिः अथवा समूहः मतदातॄन् मतदानात् निवारयितुं, भयभीतान् कर्तुं, धमकीं दातुं अथवा प्रभावितान् कर्तुं शक्नुयात्। अस्यां प्रक्रियायां ग्रामेषु, मजरासु, विभिन्नेषु क्षेत्रेषु च तादृशानां मतदातृणां मतदातृसमूहानां च चिह्नीकरणं क्रियते, ये मतदानकाले भयस्य, दबावस्य अथवा अन्यस्य कस्यापि बाधायाः सम्मुखीभवितुं शक्नुवन्ति। अपि च मतदातॄन् प्रभावितं कुर्वतां भयस्य वातावरणं निर्मातॄणां च व्यक्तीनाम् अभिज्ञानं कृत्वा तेभ्यः विरुद्धं प्रभाविणी निरोधात्मिका विधिसम्मता च कार्यवाही सुनिश्चिता करणीया। सम्बन्धितेभ्यः अधिकारिभ्यः निर्देशः प्रदत्तः यत् संवेदनशील-मतदानकेन्द्राणां चिह्नीकरणस्य सुभेद्यताक्षेत्राणां मानचित्रणस्य च कार्यवाहीसमये स्थानीयपरिस्थितीनां, पूर्वनिर्वाचनानुभवानां, विधिव्यवस्थासम्बद्धानां सूचनानां सम्यक् विश्लेषणं क्रियताम्। पुलिसप्रशासनयोः अधिकारिणः परस्परसमन्वयेन संवेदनशीलक्षेत्राणाम् अभिज्ञानं कृत्वा निर्धारित- समयसीमायाम् आवश्यकीं निरोधात्मक- कार्यवाहीं सुनिश्चितां कुर्युः।

# काश्यां समायोज्यते श्रीतुलसीशालग्रामयोः
# अष्टादशः कल्याणमहोत्सवः

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, वाराणसी (उत्तरप्रदेशम्)। धर्मस्य, भक्तेः, सनातनसंस्कृतेश्च संरक्षणाय काश्यां श्रीतुलसीशालग्रामयोः अष्टादशः कल्याणविवाह-महोत्सवः भव्यतया आयोजयितुं सज्जता प्रचलति। अयं धार्मिकमहोत्सवः २०२६ तमस्य वर्षस्य नवम्बरमासस्य १८ दिनाङ्कतः २४ दिनाङ्कपर्यन्तं विविधैः धार्मिकैः सांस्कृतिकैश्च कार्यक्रमैः सह आयोजयिष्यते।

अस्य महोत्सवस्य अध्यक्षतां श्रीमद्भागवताचार्यः रामानुजाचार्यः स्वामी सुन्दरराजजी महाराजः करिष्यति। सः आदिकेशवमन्दिरस्य कथावाचकः, काश्यां डुमरीक्षेत्रे विराजमानः अस्ति।




## कार्यक्रमस्य विवरणम्

नवम्बरमासस्य १८ दिनाङ्के, बुधवासरे (कार्तिक-शुक्लपक्षस्य अक्षयनवम्याम्) श्रीमद्भागवत-महापुराणस्य सप्ताहकथायाः अन्येषां पुराणानां च कथानां शुभारम्भः भविष्यति। नवम्बरमासस्य १९ दिनाङ्के, गुरुवासरे श्रीलक्ष्मीनारायणयज्ञस्य शोभायात्रा आयोजयिष्यते। नवम्बरमासस्य २० दिनाङ्के, शुक्रवासरे (एकादश्याम्) प्रातः पञ्चाङ्गपूजनम्, अग्निप्राकट्यं, यज्ञारम्भश्च भविष्यति। नवम्बरमासस्य २१ दिनाङ्के, शनिवासरे (द्वादश्याम्) मध्याह्ने भगवान् श्रीशालग्रामस्य तिलकोत्सवः, सायंकाले हल्दीमण्डपस्य च धार्मिकः कार्यक्रमः सम्पत्स्यते।नवम्बरमासस्य २२ दिनाङ्के, रविवासरे (त्रयोदश्याम्) सायंकाले भगवान् श्रीशालग्रामस्य माता तुलसीदेव्याश्च कल्याणविवाहमहोत्सवः, छप्पनभोगसमर्पणं च श्रद्धाभक्तिपूर्वकं भविष्यति।नवम्बरमासस्य २३ दिनाङ्के, सोमवासरे (चतुर्दश्याम्) सायंकाले भक्तिसङ्गीतमयी भजनसन्ध्या सांस्कृतिक-कार्यक्रमाश्च आयोजयिष्यन्ते।

नवम्बरमासस्य २४ दिनाङ्के, मङ्गलवासरे (पूर्णिमायाम्) यज्ञस्य पूर्णाहुतिः, सन्तमहात्मनां गमनं, देवदीपावलीमहोत्सवश्च समायोजयिष्यते।

## कथावाचकः आयोजकश्च

अस्य धार्मिकमहोत्सवस्य कथावाचकः श्रीश्री१००८ श्रीमद्भागवताचार्यः रामानुजाचार्यः स्वामी सुन्दरराजजी महाराजः भविष्यति। महोत्सवस्य आयोजकः यतिराजः श्रीविष्णुचित्तः (फलाहारी) स्वामी महाराजः अस्ति।

## महोत्सवस्य स्थलम्-

अयं महोत्सवः उत्तरप्रदेशस्य वाराणसीजनपदे डुमरीग्रामस्य सम्मुखे गङ्गातटे निर्धारिते यज्ञस्थले आयोजयिष्यते। पण्डावस्थानात् डुमरीग्रामस्य सम्मुखं गङ्गातटस्थितं यज्ञस्थलं प्राप्तुं मार्गः अस्ति। प्रह्लादघाटात् नौकया अपि प्रत्यक्षं तत्र प्राप्तुं शक्यते। आयोजकैः समस्तेभ्यः श्रद्धालुभ्यः, धर्मानुरागिभ्यः, भक्तजनेभ्यश्च सादरं निमन्त्रणं प्रदत्तम् अस्ति। ते सर्वेऽपि अस्मिन् पुण्यावसरे समागत्य भगवान् श्रीशालग्रामस्य तुलसीदेव्याश्च दिव्यकल्याणविवाहमहोत्सवे भागं गृहीत्वा भगवतः आशीर्वादं प्राप्नुयुः इति आयोजकैः प्रार्थितम्।

सम्पर्कसूत्रम्- ९४५०५८५५१४, ७३०७४१११०८।

# संस्कृतशिक्षकाणां प्रशिक्षणकार्यशालायाः आयोजनसम्बन्धिनी महत्त्वपूर्णा सूचना

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ। उत्तरप्रदेश- संस्कृतसंस्थानेन, लखनऊस्थेन, प्रदेशस्य विभिन्नमण्डलेषु कार्यरताणां संस्कृताध्यापकानां कृते पञ्चदिवसीयायाः आवासीयायाः संस्कृतशिक्षक-प्रशिक्षण- कार्यशालायाः आयोजनं क्रियते। एतस्याः कार्यशालायाः सञ्चालनं प्रदेशस्य विभिन्नमण्डलानां संस्कृताध्यापकानां कृते मण्डलक्रमेण, गणक्रमेण निर्धारितम् अस्ति। अस्मिन् क्रमे प्रथमगणस्य प्रशिक्षणकार्यक्रमः २०२६ तमस्य वर्षस्य नवम्बरमासस्य अष्टादशदिनाङ्कात् कानपुरमण्डलस्य संस्कृताध्यापकानां कृते आयोजयिष्यते। तदनन्तरं नवम्बरमासस्य त्रयोविंशतिदिनाङ्कात् झाँसीमण्डलस्य चित्रकूटमण्डलस्य च संस्कृताध्यापकानां प्रशिक्षणकार्यक्रमः समारप्स्यते। प्रदेशस्य अवशिष्टमण्डलानां संस्कृताध्यापकानां प्रशिक्षणस्य तिथयः अद्यापि निर्धारिताः न सन्ति। तासां तिथीनां निर्धारणानन्तरं सम्बन्धितमण्डलेभ्यः पृथक् सूचना प्रेषयिष्यते। अतः कानपुरमण्डलं, झाँसीमण्डलं, चित्रकूटमण्डलं विहाय अन्येषां मण्डलानां संस्कृताध्यापकाः अधुना प्रशिक्षणार्थं लखनऊनगरम् आगन्तुं प्रवासस्य सज्जतां न कुर्वन्तु। ते स्वस्वमण्डलस्य प्रशिक्षणस्य निर्धारितितिथि- सम्बन्धिनीम् अधिकृतसूचनां प्रतीक्षन्ताम्।

# श्रीजगन्नाथधाम्नि

## छठपूजायाः भव्यम् आयोजनम्



हिमसंस्कृतवार्ताः- पुरी, 16.11.2026- श्रीजगन्नाथ-संस्कृत- विश्वविद्यालयस्य व्याकरणविभागस्य आचार्यया डॉ. प्रज्ञाशर्ममहोदयया श्रीजगन्नाथपुरीधाम्नि देशस्य विविधप्रान्तेभ्यः समागताभिः छठव्रतानुरागिणीभिः मातृभिः साकं छठपूजायाः पावनम् आचरणं कृतम्। नरेन्द्रपुष्करिण्याः तटे अयं दिव्यः उत्सवः सम्पन्नः। यत्र किल भगवान् जगन्नाथः नौकाविहारं करोति, यत्र च तस्य दिव्या पूजा भवति, तस्मिन् एव पवित्रे स्थाने विविधप्रान्तेभ्यः- पुणे, भोपालम्, बिहारम् इत्यादिभ्यः च समागताः महिलाः छठपूजायाम् सम्मिलिताः।

**सायंकालीनः अर्घ्यः, प्रातःकालीनः अर्घ्यः च**

व्रतिन्यः सायंकाले अस्ताचलगामिने सूर्याय अर्घ्यं प्रददुः, प्रातःकाले च उदयमानाय सूर्याय अर्घ्यं समर्प्य पूजां सम्पूर्णां चक्रुः। सूर्यदर्शनम्, जलमध्ये स्थित्वा अर्घ्यदानम्, छठीमैय्याः भजनकीर्तनम्- सर्वम् अत्यन्तं भक्तिमयं वातावरणं निर्मितम्।

**अयम् अवसरः देशवासिनां कृते अत्यन्तं सौभाग्यात्मकः, प्रेरणात्मकः च आसीत्- डॉ. प्रज्ञाशर्ममहोदयायाः सन्देशः**

अस्मिन् अवसरे डॉ. प्रज्ञाशर्ममहोदयया माध्यमकर्मिभ्यः छठपूजायाः महत्त्वं विवृतम्।

तया उक्तम्- "श्रीजगन्नाथपुरी इव भगवतः पावने सान्निध्ये छठपूजायाः आचरणस्य एकः विशिष्टः एव महिमा अस्ति। अत्र सूर्यः साक्षात् स्वकिरणैः समुद्रस्य तरङ्गान् प्रकाशयति। अत्र छठी मैय्याः पूजा, सूर्योपासना च आत्मशुद्धेः, लोककल्याणस्य च प्रतीकम् अस्ति।" तया सर्वेभ्यः देशवासिभ्यः आह्वानं कृतं यत् छठपूजायाः पावनवातावरणे सर्वे सम्मिलिताः भवन्तु। तया सर्वेभ्यः प्रणामाः निवेदिताः, छठीमैय्याः हार्दिक्यः शुभकामनाः, अभिनन्दनं, वन्दनं च समर्पितम्।

**सर्वत्र भक्तिमयं वातावरणम्**

नरेन्द्रपुष्करिण्याः तटे देशस्य सर्वेषु क्षेत्रेषु इव अतीव सुन्दरं भक्तिमयं वातावरणम् आसीत्।

# केन्द्रीय- संस्कृत- विश्वविद्यालये राष्ट्रिय- पुस्तकालय- सप्ताहस्य-२०२६ आयोजनम्

**हिमसंस्कृतवार्ताः- नवदेहली।** पुस्तकानि केवलं ज्ञानार्जनस्य साधनानि न सन्ति, अपितु जीवनाय नवीनां दिशं प्रदातुं, विचारान् समृद्धान् कर्तुं, व्यक्तित्वस्य विकासाय च सशक्तम् आधारभूतं माध्यमानि सन्ति। पुस्तकानि एव मानवजीवनस्य मौनमार्गदर्शकानि सन्ति, यानि ज्ञानप्रकाशेन जीवनस्य प्रत्येकं मार्गम् आलोकयन्ति। अस्यामेव भावनायां ज्ञानसंवर्धनस्य पठनपाठनपरम्परायाश्च प्रोत्साहनार्थं नवदेहल्याः जनकपुरीस्थे केन्द्रीय-संस्कृत- विश्वविद्यालये राष्ट्रिय- पुस्तकालय-सप्ताहः- २०२६ समायोज्यते। अस्य सप्ताहस्य उद्घाटनसमारोहः २०२६ तमस्य वर्षस्य नवम्बरमासस्य षोडशे दिनाङ्के प्रातः एकादशवादने भविष्यति।

उद्घाटनसमारोहस्य अध्यक्षतां विश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवासवरखेडीमहोदयः करिष्यति। अस्मिन् गरिमामये अवसरे हरियाणाप्रदेशस्य कैथलनगरे स्थितस्य महर्षिवाल्मीकि- संस्कृत- विश्वविद्यालयस्य कुलगुरुः प्रो. (डॉ.) राजेन्द्रकुमार अनायातमहोदयः मुख्यातिथिरूपेण समुपस्थास्यति।

**सप्ताहव्यापिन्यः प्रमुखाः गतिविधयः**

- नवम्बरमासस्य १६ दिनाङ्के- उद्घाटनसमारोहः, पुस्तकप्रदर्शनी च।
- नवम्बरमासस्य १७ दिनाङ्के- पुस्तकावरण-निर्माणप्रतियोगिता।
- नवम्बरमासस्य १८ दिनाङ्के- ध्येयवाक्यलेखन-प्रतियोगिता।
- नवम्बरमासस्य १९ दिनाङ्के- पुस्तकचिह्न-निर्माणप्रतियोगिता।
- नवम्बरमासस्य २० दिनाङ्के- समापनसमारोहः, पुरस्कारवितरणञ्च।

अस्मिन् ज्ञानोत्सवे सर्वेषां पुस्तकप्रेमिणां, विद्यार्थिनां, शोधच्छात्राणां तथा अध्यापकानां सहभागितायै सादरम् आमन्त्रणं प्रदीयते। पुस्तकानां प्रति अनुरागस्य विकासः, पठनपाठनस्य स्वाध्यायस्य च परम्परायाः संवर्धनं, भारतीय- ज्ञान- परम्परायाः संरक्षणं, ज्ञानसाधनायाः समृद्धपरम्परायाः अग्रे प्रवर्तनम् अस्य आयोजनस्य प्रमुखम् उद्देश्यम् अस्ति।

**कार्यक्रमस्य स्थानं समयः च**

स्थानम्- सारस्वतसभागारः, केन्द्रीय- संस्कृत-विश्वविद्यालयः, जनकपुरी, नवदेहली।

उद्घाटनसमयः- प्रातः ११:०० वादनम्।अतः सर्वे पुस्तकप्रेमिणः अस्मिन् ज्ञानमहोत्सवे सहभागीभूय पठनसंस्कृतेः संवर्धने स्वकीयम् अमूल्यं योगदानं यच्छन्तु। पुस्तकानि अस्माकं मौनमार्गदर्शकानि सन्ति, येषां ज्ञानप्रकाशः जीवनस्य प्रत्येकं पन्थानम् आलोकयति।

# सन्तकबीरनगरजनपदे निर्वाचनकार्मिकाणां विवरणसङ्कलनाय निर्देशाः

**विधानसभासामान्यनिर्वाचनम्- २०२७: अन्तर्जालमाध्यमेन निर्वाचन- कार्मिक-नियोजनप्रणाल्याः उपयोगेन विवरणसङ्ग्रहः।**

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, सन्तकबीरनगरम्, उत्तरप्रदेशः।

आगामिनि २०२७ तमे वर्षे आयोज्यमानस्य विधानसभायाः सामान्यनिर्वाचनस्य सज्जतायाः दृष्ट्या मतदानकार्मिकाणां विवरणसङ्ग्रहणस्य कार्यं प्रारब्धम् अस्ति। अस्य कार्यस्य अन्तर्गतं अन्तर्जालाधारितायाः निर्वाचन- कार्मिक-नियोजनप्रणाल्याः माध्यमेन समस्तेषां मतदानकार्मिकाणां विवरणानि सङ्गृहीतुं व्यवस्था क्रियते। अस्मिन् सन्दर्भे उत्तरप्रदेशस्य संयुक्त-मुख्यनिर्वाचनाधिकारिणः पत्राङ्कः ७६१/ सीईओ-१-१४५/ १-२००६ टीसी ०५, दिनाङ्कः १२ नवम्बर २०२६ इत्यस्य निर्देशानुसारं सन्तकबीरनगरजनपदस्य मुख्यविकासाधिकारिणा, मतदानकार्मिकप्रभारी-अधिकारिणा च जवाहरत्रिपाठिना समस्तेभ्यः जनपदस्तरीयाधिकारिभ्यः कार्यालयाध्यक्षेभ्यश्च आवश्यकाः निर्देशाः प्रदत्ताः।निर्देशानुसारं मतदानकार्मिकाणां विवरणसङ्कलनार्थं प्रपत्रम्-१ इत्यस्य छायाप्रतिः संलग्नीकृत्य प्रेषिता अस्ति। सर्वैः सम्बन्धिताधिकारिभिः निर्धारितप्रारूपेण आवश्यकसूचनाः पूरयित्वा २०२६ तमस्य वर्षस्य नवम्बरमासस्य १६ दिनाङ्के अपराह्णे एकवादनपर्यन्तम् अधोहस्ताक्षरिणे उपलब्धाः कारयितव्याः इति निर्देशितम्। अस्य कार्यस्य माध्यमेन आगामीविधानसभानिर्वाचनाय मतदानकार्मिकाणां विवरणानि समये एव सङ्गृह्य निर्वाचनसम्बद्धानि व्यवस्थापनकार्याणि सुव्यवस्थितरीत्या सम्पादयितुं शक्यानि भविष्यन्ति।

# जनगणना-२०२७

## स्वयमेव स्वविवरणं पञ्जीकृत्य जनगणना-कार्यक्रमे सहभागी भवन्तु।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, अमेठी

जालस्थानम्- se.census.gov.in स्वगणना- २०२६ तमस्य वर्षस्य नवम्बरमासस्य १६ दिनाङ्कात् ३० दिनाङ्कपर्यन्तम्।जनसंख्यागणना- २०२६ तमस्य वर्षस्य दिसम्बरमासस्य १ दिनाङ्कात् २०२७ तमस्य वर्षस्य जनवरीमासस्य ४ दिनाङ्कपर्यन्तम्।

अस्मिन् कालावधौ प्रगणकाः भवतां गृहम् आगत्य जनगणनासम्बद्धं कार्यं करिष्यन्ति। अतः कृपया तेभ्यः सम्यक् सत्यां च सूचनां प्रदाय जनगणनाकार्ये पूर्णं सहयोगं कुर्वन्तु। जनगणना-कार्यक्रमे सहभागिता राष्ट्रनिर्माणे महत्त्वपूर्णं योगदानम् अस्ति। भवतां सहभागिता, राष्ट्रस्य समृद्धिः।



# श्रीलालबहादुरशास्त्री- राष्ट्रिय- संस्कृत- विश्वविद्यालये दशमः महानादमहोत्सवः- २०२६




## भारतीयशास्त्रीयसङ्गीतस्य नृत्यकलायाश्च मनोहारिभिः प्रस्तुतिभिः सुसज्जितं भविष्यति सांस्कृतिकमञ्चम्।

हिमसंस्कृतवार्ताः- नवदेहली। श्रीलालबहादुरशास्त्री- राष्ट्रिय- संस्कृत-विश्वविद्यालयस्य नवदेहलीस्थस्य सङ्गीतविभागस्य, रागाञ्जलि- प्रदर्शनकलाऽकादम्याः संयुक्तत्त्वावधाने दशमः महानादमहोत्सवः- २०२६ इत्याख्यः भव्यः सांस्कृतिकसमारोहः २०२६ तमस्य वर्षस्य नवम्बरमासस्य १७ दिनाङ्के प्रातः १० वादने विश्वविद्यालयस्य स्वामिविवेकानन्दसभागारे आयोजयिष्यते। भारतसर्वकारस्य संस्कृति-मन्त्रालयस्य, कलाव्योम-प्रतिष्ठानस्य सहयोगेन आयोज्यमानः अयं महोत्सवः भारतीय-शास्त्रीयसङ्गीतस्य नृत्यकलायाश्च समृद्धां सांस्कृतिकपरम्परां समर्पितः भविष्यति।

अस्मिन्नवसरे विश्वविद्यालयस्य माननीयः कुलपतिः प्रो. मुरलीमनोहरपाठकः स्वकीयशुभकामनासन्देशे अवदत् यत् भारतीयशास्त्रीयसङ्गीतं नृत्यकला च अस्माकं समृद्धायाः सांस्कृतिकचेतनायाः, आध्यात्मिकपरम्परायाः, राष्ट्रियपरिचयस्य च सशक्ते संवाहके स्तः। सङ्गीतं मानवान्तःकरणस्य परिष्काराय, जीवने संवेदनशीलतायाः, अनुशासनस्य, सौन्दर्यबोधस्य च विकासाय प्रभावशालि साधनम् अस्ति। महानाद-महोत्सवादृशाः आयोजनाः भारतीय- कलायाः सांस्कृतिकधरोहरस्य च संरक्षणे, संवर्धने तथा नवपीढ्याः शास्त्रीयकलाभिः सह संयोजने महत्त्वपूर्णां भूमिकां निर्वहिष्यन्तीति सः विश्वासं प्रकटितवान्। आयोजनस्य सफलतायै सर्वेभ्यः आयोजकेभ्यः, कलाकारिभ्यः, प्रतिभागिभ्यश्च सः हार्दिकाः शुभकामनाः प्रदत्तवान्। विश्वविद्यालयस्य कुलसचिवः प्रो. पवनकुमारशर्मा अवदत् यत् भारतीयशास्त्रीयसङ्गीतं नृत्यकला च अस्माकं प्राचीनज्ञानपरम्परायाः सांस्कृतिकवैभवस्य च अभिन्नौ अङ्गौ स्तः। एतादृशानि आयोजनानि छात्रेषु सृजनात्मकतायाः, कलात्मकाभिरुचेः, भारतीय-सांस्कृतिक- मूल्यानां प्रति सम्मानभावनायाश्च विकासे महत्त्वपूर्णां भूमिकां निर्वहन्ति। पुराणविद्यासङ्कायस्य प्रमुखः प्रो. शीतलाप्रसादशुक्लः अवदत् यत् भारतीयसङ्गीतं नृत्यकला च अस्माकं सनातनसांस्कृतिकचेतनायाः अमूल्ये धरोहरौ स्तः। महानादमहोत्सवः कलाकाराणां साधनायाः, प्रतिभायाः, सांस्कृतिकाभिव्यक्तेश्च प्रदर्शनाय मञ्चं प्रददाति। एषः महोत्सवः भारतीयकलापरम्परायाः व्यापकसमाजे प्रचारप्रसाराय अपि महत्त्वपूर्णः अवसरः अस्ति। महोत्सवस्य संयोजकः डॉ. बिपुलकुमाररायः तथा सहसंयोजकः डॉ. जगजीतशाहः अवदताम् यत् अस्मिन् महोत्सवे शास्त्रीयसङ्गीतस्य नृत्यकलायाश्च उत्कृष्टाभिः प्रस्तुतिभिः भारतीयसांस्कृतिकधरोहरायाः अनुपमा शोभा प्रदर्शयिष्यते। महोत्सवे देशस्य प्रतिष्ठिताः कलाकाराः शास्त्रीयसङ्गीतस्य नृत्यकलायाश्च विविधासु विधासु मनोहारिणीः प्रस्तुतयः प्रदास्यन्ति। पण्डितः प्रमोदगायकवाडः तथा सुश्री नम्रतागायकवाडः शहनाईवादनं प्रस्तुतयिष्यतः। तयोः वाद्यप्रस्तुतौ तबलावादने पण्डितः अमितचटर्जी सङ्गतिं करिष्यति। पण्डितः सुधाकरचव्हाणः हिन्दुस्तानीशास्त्रीयगायनं प्रस्तुतयिष्यति। अस्मिन् गायनकार्यक्रमे तबलावादने पण्डितः केशवजोशी तथा हार्मोनियमवादने क्षितिजकुमारसिंहः सङ्गतिं करिष्यतः। अपरतः सुश्री सौम्या भरतनाट्यम् इति शास्त्रीयनृत्यं, सुश्री स्वातिरजकः कथकनृत्यस्य आकर्षकाप्रस्तुतिं करिष्यति। भारतीय- शास्त्रीय- सङ्गीतस्य नृत्यकलायाश्च परम्पराणां संरक्षणाय, संवर्धनाय, व्यापकप्रचारप्रसाराय च समर्पितस्य अस्य महोत्सवस्य प्रवेशः सर्वेभ्यः पूर्णतया निःशुल्कः भविष्यति। विश्वविद्यालयप्रशासनस्य पक्षतः समस्तेभ्यः सङ्गीतकलाप्रेमिभ्यः अस्मिन् सांस्कृतिकसमारोहे सहभागितायै सादरं निमन्त्रणं प्रदत्तम् अस्ति। अयं महोत्सवः भारतीय- शास्त्रीय-कलानां गौरवशालिनीं परम्परां नवपीढ्याः समक्षं प्रस्तोतुं सांस्कृतिकचेतनायाः संवर्धनाय च महत्त्वपूर्णं माध्यमं भविष्यति।

# क्षेत्रीयविज्ञान- वैदिकगणितमेलकस्य संस्कृतिमहोत्सवस्य च समापनसमारोहः सम्पन्नः

## सुलतानपुरे त्रिदिवसीयस्य शैक्षिक- सांस्कृतिकायोजनस्य भव्यः समापनसमारोहः






**हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः,** सुलतानपुरम्। विद्याभारती अखिलभारतीय-शिक्षासंस्थानस्य पूर्वी- उत्तरप्रदेशक्षेत्रस्य तत्त्वावधाने सुलतानपुरस्थे सरस्वतीविद्यामन्दिरे वरिष्ठमाध्यमिकविद्यालये आयोजितस्य क्षेत्रीयविज्ञानमेलकस्य, वैदिकगणितमेलकस्य संस्कृतिमहोत्सवस्य च समापनसमारोहे क्षेत्रीयाध्यक्षरूपेण दिव्यकान्तशुक्लमहोदयः सहभागितां कृतवान्, समारोहस्य च अध्यक्षताम् अपि निर्वाहितवान्।अस्मिन् त्रिदिवसीये आयोजने छात्राणां वैज्ञानिकप्रतिभायाः, वैदिकगणिते रुचेः, सृजनात्मकतायाः भारतीयसंस्कृतेः प्रति समर्पणभावनायाश्च मनोहरः समन्वयः दृष्टः। एतादृशाः शैक्षिकाः आयोजनाः विद्यार्थिनां प्रतिभाप्रदर्शनाय उत्तमं मञ्चं प्रददति। एतेषां माध्यमेन छात्रेषु नवाचारभावनायाः, वैज्ञानिकदृष्टिकोणस्य, भारतीयज्ञानपरम्परायाः सांस्कृतिकमूल्यानां च विकासः भवति। एते आयोजनाः संस्कारितस्य, समर्थस्य आत्मनिर्भरस्य च भारतस्य निर्माणे महत्त्वपूर्णां भूमिकां निर्वहन्ति। अस्य भव्यस्य आयोजनस्य सफलसञ्चालनार्थम् आयोजकसमितये, विद्यालयपरिवाराय, सर्वेभ्यः आचार्येभ्यः, प्रतिभागिभ्यः छात्रेभ्यश्च हार्दिकाः शुभकामनाः अभिनन्दनानि च समर्पितानि।

अवसरेऽस्मिन् दिव्यकान्तशुक्लमहोदयेन शिक्षाक्षेत्रं नवोन्नतिशिखरं प्रापयितुं, संस्कारितस्य, समर्थस्य आत्मनिर्भरस्य च भारतस्य निर्माणाय सामूहिकसङ्कल्पं कर्तुं आह्वानं कृतम्।

- दिव्यकान्तशुक्लः
क्षेत्रीयाध्यक्षः
विद्या भारती, पूर्वी उत्तरप्रदेशक्षेत्रम्




# ज्ञानस्थल्यां सड़क-सुरक्षा-पक्षस्य उद्घाटन-समारोहः सम्पन्नः

**नगरक्षेत्राधिकरिणा रविकान्तगोण्डेन जनसामान्यं प्रति यातायातनियमानां पालनस्य आह्वानम्।**

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः। परिवहनविभागस्य तत्त्वावधाने ज्ञानस्थली-स्थाने २०२६ तमस्य वर्षस्य नवम्बरमासस्य १६ दिनाङ्कात् ३० दिनाङ्कपर्यन्तम् आयोज्यमानस्य सड़क- सुरक्षा- पक्षस्य उद्घाटनसमारोहः सम्पन्नः। अस्मिन् कार्यक्रमे नगरक्षेत्राधिकारी रविकान्तगोण्डः सहभागिताम् अकरोत्। अस्मिन् अवसरे तेन सड़क-सुरक्षायाः विषये जनसामान्यं जागरूकं कर्तुं, यातायातनियमानां पालनं सुनिश्चितं कर्तुं, मार्गदुर्घटनानां न्यूनीकरणं कर्तुं सञ्चाल्यमानस्य विशेषाभियानस्य विषये विस्तरेण सूचना प्रदत्ता। सड़क-सुरक्षा-पक्षस्य अवधौ आरक्षिविभागेन प्रतिदिनं सम्पादनीयानां निर्धारितकार्यवाहीणां विषये पूर्वमेव जनपदस्य सर्वेभ्यः थानाप्रभारिभ्यः, यातायातनिरीक्षकेभ्यः च आवश्यकाः निर्देशाः प्रदत्ताः सन्ति। अस्य अभियानस्य अन्तर्गतं यातायातनियमानाम् उल्लङ्घनं कुर्वतां वाहनचालकानां विरुद्धं नियमानुसारं प्रवर्तनात्मककार्यवाही विधास्यते। शिरस्त्राणस्य धारणम्, आसनपट्टिकायाः उपयोगः, अतिवेगेन वाहनचालनस्य निषेधः, विपरीतदिशि वाहनचालनस्य निरोधः, अन्येषां यातायातनियमानां च पालनविषये जनजागरणं विधास्यते। नियमपालनं सुनिश्चितं कर्तुं समुचिताः कार्यवाहीः अपि क्रियन्ते। सड़क-सुरक्षा एव जीवनरक्षा।



# "कनकधारास्तोत्र निर्माणस्य कथा"

एकस्मिन् समये शङ्कराचार्यः भिक्षार्थं दरिद्रस्य ब्राह्मणस्य गृहं गतः। 'भिक्षां देहि' इति आहूतवान्। तस्मिन् गृहे भिक्षाभोजनस्य कणिका अपि नासीत्। ब्राह्मणस्त्री तस्य भिक्षाकटोरे शुष्कं आम्लं स्थापितवती। तस्याः दुर्दशां दृष्ट्वा शङ्कराचार्यं करुणां प्रस्रवतः। तदा सः महालक्ष्मीं प्रार्थितवान् तथा च ब्राह्मणस्त्रीपरिवारस्य दारिद्र्यं दूरीकर्तुं प्रार्थितवान्। स्तोत्रप्रभावेण, शङ्कराचार्यस्य सकारात्मक शब्दप्रभावेण सुवर्णाम्लाः फलानि आकाशात् अवर्षत्। तस्य कुटुम्बस्य दारिद्र्यं निवृत्तम्। एतादृशी आख्यायिका प्रसिद्धा। आर्थिकसमृद्धयै, कुलप्रगतेः, लक्ष्मीः गृहे स्थिरः भवितुं एतत् स्तोत्रं नित्यं पठितव्यम्।

कनकधारास्तोत्रम्-

अङ्गं हरेः पुलकभूषणमाश्रयन्ती।
भृङ्गाङ्गनेव मुकुलाभरणं तमालम्।।
एतत् अतीव सुन्दरं स्तोत्रम् अस्ति।

**डॉ. वर्षा प्रकाश टोणगांवकर**
**पुणे / महाराष्ट्रम्**

# श्रद्धा-भक्तिपूर्वकं सम्पन्नं छठमहापर्व,

## सूर्योपासनया भक्तिमयं जातं भारतभारी-मन्दिरपरिसरम्

**हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, सिद्धार्थनगरम्।** उत्तरप्रदेशस्य सिद्धार्थनगरजनपदस्य नगरपञ्चायत् भारतभारीस्थे मन्दिरपरिसरे अद्य नवम्बरमासस्य षोडशे दिनाङ्के लोकश्रद्धायाः, धार्मिकनिष्ठायाः, आध्यात्मिक-चेतनायाश्च प्रतीकरूपं पवित्रं छठमहापर्व अत्यन्तम् उत्साहेन, श्रद्धया भक्तिभावेन च समायोजितम्। अस्मिन् पावनावसरे सम्पूर्णः मन्दिरपरिसरः भक्तिमयेन वातावरणेन, धार्मिकश्रद्धया च परिपूर्णः अभवत्। सूर्यदेवस्य आराधनया छठीमातुः भक्तिपूर्णया स्तुत्या च सम्पूर्णे क्षेत्रे आध्यात्मिकस्य उल्लासस्य सञ्चारः अभवत्। छठमहापर्वं भारतीयसनातनसंस्कृतेः प्राचीनतमेषु, पवित्रतमेषु च पर्वसु अन्यतमम् अस्ति। एतत् पर्व विशेषतः सूर्यदेवस्य उपासनायाः, प्रकृतेः प्रति कृतज्ञतायाः, आत्मसंयमस्य, शुद्धतायाः, तपस्यायाश्च अद्भुतं प्रतीकम् अस्ति। अस्मिन् पर्वणि व्रतिनः पूर्णश्रद्धया, निष्ठया, नियमसंयमेन च भगवन्तं सूर्यनारायणम् उपासते, छठीमातरं च प्रति भक्तिभावं समर्पयन्ति।

अस्य महापर्वणः धार्मिकमहत्त्वं अत्यन्तं विशिष्टम् अस्ति। सूर्यदेवः समस्तजगतः जीवनस्य, ऊर्जायाः, प्रकाशस्य च मूलस्रोतः मन्यते। तस्य उपासनया मानवजीवने आरोग्यस्य, सुखसमृद्धेः, शान्तेः, सौभाग्यस्य च कामना क्रियते। छठीमातुः आराधना सन्तानानां दीर्घायुषः, परिवारस्य कल्याणस्य, सुखसमृद्धेः च कामनया क्रियते। व्रतिनः कठिननियमान् पालयन्तः उपवासं कुर्वन्ति, पवित्रतां धारयन्ति, भक्तिपूर्वकं पूजासामग्रीं समर्पयन्ति च। भारतभारीनगरपञ्चायतस्य मन्दिरपरिसरे आयोजिते अस्मिन् धार्मिकसमारोहे छठपूजायाः मनोहराणि दृश्यानि विशेषतया आकर्षणस्य केन्द्राणि अभवन्। भक्तानां श्रद्धा, व्रतिनां निष्ठा, पूजायाः पवित्रता, धार्मिकपरम्पराणां मनोहारिणी अभिव्यक्तिश्च सम्पूर्णस्य वातावरणस्य शोभां वर्धितवती। अस्य पावनपर्वणः अद्भुतानि, मनोहारिणि च दृश्यानि आकाशीय- चलच्चित्र-ग्राहकयन्त्रेण चित्रितानि। आकाशमार्गेण गृहीतानि छठपूजायाः दृश्यचित्राणि मन्दिरपरिसरस्य धार्मिकवैभवं, भक्तानां श्रद्धाम्, आयोजनस्य भव्यतां च सुन्दररूपेण प्रदर्शयन्ति। एतानि दृश्यचित्राणि पर्वणः आध्यात्मिकसौन्दर्यं, भारतीय- धार्मिक-परम्परायाः गौरवं प्रभावपूर्णतया प्रकाशयन्ति।

छठमहापर्व केवलं धार्मिकानुष्ठानं नास्ति, अपितु सामाजिकैकतायाः, पारिवारिकसौहार्दस्य, सामूहिक- सहयोगस्य, लोकसंस्कृतेः संरक्षणस्य च महत्त्वपूर्णः उत्सवः अपि अस्ति। एतत् पर्व मानवसमाजं प्रकृतेः संरक्षणाय, स्वच्छतायै, संयमाय, कर्तव्यनिष्ठायै, परस्परप्रेम्णे च प्रेरयति। सूर्यस्य प्रकाशः यथा समस्तेषु प्राणिषु समानरूपेण प्रसृतः भवति, तथैव अस्य पर्वणः सन्देशः अपि



सर्वेषां कृते कल्याणस्य, समतायाः, सद्भावस्य च प्रेरणां ददाति।

भारतभारीनगरपञ्चायतस्य मन्दिरपरिसरे श्रद्धया भक्त्या च सम्पन्नम् इदं छठमहापर्व स्थानीय-धार्मिक- परम्परायाः, सनातनसंस्कृतेः, जनमानसस्य च दृढसम्बन्धं पुनः स्मारितवान्। अस्मिन् पावनावसरे भक्तजनाः सूर्यदेवस्य कृपां, छठीमातुः आशीर्वादं च प्रार्थयन्तः सर्वेषां परिवाराणां सुखं, समृद्धिं, आरोग्यं, शान्तिं च कामितवन्तः।

**अन्ते सर्वैः भक्तिपूर्णभावेन प्रार्थितम्-**

जयतु छठीमाता! जयतु भगवान् सूर्यनारायणः! सर्वेषां जीवनं सुखमयं, निरामयं, समृद्धं च भवतु। सर्वेषु गृहेषु शान्तिः, सौहार्दं, समृद्धिश्च विराजताम्। छठीमातुः कृपा सर्वेषु भक्तजनेषु सततं वर्तताम्।

# सिद्धार्थनगरे पञ्चदशदिवसीयः मार्गसुरक्षापक्षः समारब्धः



## कपिलवस्तुक्षेत्रस्य विधायकः श्यामधनी राही मार्गसुरक्षाशपथं कारितवान्, प्रचारवाहनं हरितध्वजं प्रदर्श्य प्रेषितम्।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, सिद्धार्थनगरम्, १६ नवम्बर २०२६। उत्तरप्रदेशे वर्धमानानां मार्गदुर्घटनानां तथा तासु मृतानां जनानां सङ्ख्यायाः न्यूनीकरणस्य उद्देश्येन सर्वेषां सम्बन्धितविभागानां समन्वितप्रयत्नेन नवम्बरमासस्य षोडशदिनाङ्कतः त्रिंशद्दिनाङ्कपर्यन्तं पञ्चदशदिवसीयः मार्गसुरक्षापक्षः आयोज्यते। अस्य उद्घाटनसमारोहः अद्य १६ नवम्बर २०२६ दिनाङ्के पूर्वाह्णे एकादशवादने सिद्धार्थनगरस्य सहायक- सम्भागीय-परिवहनाधिकारी-कार्यालये सम्पन्नः। उत्तरप्रदेशशासनस्य मुख्यसचिवस्य परिवहनानुभाग-३ इत्यस्य पत्राङ्कः १६८५/ तीस- ३- २०२६, दिनाङ्कः ०५ नवम्बर २०२६ तथा उत्तरप्रदेशस्य परिवहनायुक्तस्य पत्राङ्कः ३४७३/ स०सु०/ २०२६-१६/ स०सु०/ २०२३, दिनाङ्कः ०६ नवम्बर २०२६ इत्यनयोः निर्देशानामनुपालनेन अयं कार्यक्रमः आयोजितः। अस्य उद्घाटनं कपिलवस्तुक्षेत्रस्य माननीयविधायकेन श्यामधनीराहीमहोदयेन स्वकरकमलाभ्यां कृतम्।

कार्यक्रमस्य प्रारम्भे मुख्यातिथये विशिष्टातिथिभ्यश्च पुष्पगुच्छानि प्रदाय स्वागतं कृतम्। ततः कार्यक्रमस्य क्रमं प्रवर्तयन् सहायक- सम्भागीय-परिवहनाधिकारी महोदयः अवदत् यत् मार्गदुर्घटनानां न्यूनीकरणाय मार्गसुरक्षानियमानां पालनम् अत्यावश्यकम् अस्ति। दुर्घटनायां घातितानां मृतानां च जनानां प्रति संवेदनां प्रकटयन् सः दुर्घटनाग्रस्तं घातितं जनं विलम्बं विना चिकित्सालयं प्रापयितुं सर्वेभ्यः आग्रहं कृतवान्। अस्मिन्नेव क्रमे यातायातनिरीक्षकः अजयकुमारसिंहः यातायातनियमानां विषये छात्रान् जागरूकान् कृतवान्। निर्धारितवयोमर्यादां पूरयित्वा वैधचालनानुज्ञापत्रं प्राप्य एव वाहनचालनं करणीयम् इति सः छात्रान् उपदिष्टवान्। मार्गदुर्घटनायाः घटने सति तत्कालं ११२ दूरभाषसङ्ख्यायाम् आरक्षिणः, १०८ दूरभाषसङ्ख्यायां रुग्णवाहिकायाः सेवायाः सूचनां दातुं च आग्रहं कृतवान्। खण्डशिक्षाधिकारी रामकुमारसिंहः वाहनचालनसमये स्वयं शिरस्त्राणस्य प्रयोगं कर्तुं तथा अन्यान् अपि तस्य प्रयोगाय प्रेरयितुं जनान् अनुरुद्धवान्। लोकनिर्माणविभागस्य अधिशासी अभियन्ता श कमलकिशोरः मार्गपार्श्वेषु स्थापितानां सुरक्षासङ्केतचिह्नानां निर्देशानां च पालनं कर्तुं तथा निर्धारितवेगमर्यादायामेव वाहनं चालयितुं सर्वान् प्रार्थितवान्।तदनन्तरं मुख्यातिथिः श्यामधनीराही महोदयः उपस्थितान् नागरिकान् विद्यार्थिनश्च मार्गसुरक्षायाः विषये जागरूकान् कृतवान् तथा सर्वेभ्यः मार्गसुरक्षाशपथं कारितवान्। शपथग्रहणेन कार्यक्रमस्य समापनम् अभवत्। कार्यक्रमानन्तरं मुख्यातिथिः मार्गसुरक्षाविषयकं प्रचारवाहनं हरितध्वजं प्रदर्श्य प्रेषितवान्। अस्मिन् उद्घाटनसमारोहे उपमुख्यचिकित्साधिकारी डॉ. ए. के. अग्रहरी, लोकनिर्माणविभागस्य अधिशासी अभियन्ता कमलकिशोरः, सहायक- सम्भागीय-परिवहनाधिकारी सञ्जयकुमारसिंहः, यातायात-निरीक्षकः अजयकुमारसिंहः, रोडवेज- संस्थायाः सहायक- क्षेत्रीयप्रबन्धकः विजयकुमारगङ्गवारः, खण्डशिक्षाधिकारी रामकुमारसिंहः, राजकीय-महिलान्तर- महाविद्यालयस्य प्राचार्या शिवाशर्मा, परिवहनकार्यालयस्य समस्ताः अधिकारिणः कर्मचारिणश्च उपस्थिताः आसन्। मार्गसुरक्षायाः नियमपालनमेव दुर्घटनानिवारणस्य प्रमुखः उपायः इति सन्देशः अस्मिन् कार्यक्रमे सर्वेभ्यः प्रदत्तः।

## शोहरतगढ़स्य नूतनः थाना-प्रभारी अभवत् निरीक्षकः अरविन्दशर्मा, गोल्हौराथानस्य दायित्वं प्राप्तवान् निरीक्षकः शेषमणिपाण्डेयः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, सिद्धार्थनगरम्। जनपदस्य विधि-व्यवस्थां अधिकं सुदृढां प्रभावपूर्णां च कर्तुं पुलिस-अधीक्षकः डॉ. अभिषेकमहाजनः पुलिस-विभागे प्रशासनिकं परिवर्तनं कुर्वन् अनेकानां निरीक्षकाणां तथा उपनिरीक्षकाणां कार्यक्षेत्रेषु परिवर्तनम् अकरोत्। अस्मिन् प्रशासनिके परिवर्तने पुलिस-आरक्षालयात् आगतः निरीक्षकः अरविन्दशर्मा शोहरतगढ़-पुलिसस्थानकस्य नूतनः प्रभारी निरीक्षकः नियुक्तः अस्ति। अपरतः शोहरतगढ़-स्थानकस्य पूर्वप्रभारी निरीक्षकः शेषमणिपाण्डेयः गोल्हौरा-थानस्य प्रभारी निरीक्षकत्वेन नियुक्तः अस्ति। तथैव शोहरतगढ़-स्थानके कार्यरतः उपनिरीक्षकः शशिशेखरसिंहः पुलिस-अधीक्षकस्य जनसम्पर्काधिकारिपदे (पी.आर.ओ.) नियुक्तः अस्ति। प्राप्तविवरणानुसारं नवनियुक्तः थानाप्रभारी निरीक्षकः अरविन्दशर्मा एतस्मात् पूर्वं सन्तकबीरनगरजनपदे बखिरा-दुधारा-स्थानकयोः प्रभारीरूपेण स्वसेवां प्रदत्तवान् अस्ति। अधुना तस्मै शोहरतगढ़-थानस्य दायित्वं समर्पितम् अस्ति।

## नवागतः जिलाधिकारी गौरवसिंहसोगरवालः सिद्धार्थनगरम् आगत्य कोषागारे पदभारम् अगृह्णात्, स्वकीयाः प्राथमिकताः च प्रकाशितवान्

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, सिद्धार्थनगरम्। जनपदस्य नवागतः जिलाधिकारी गौरवसिंहसोगरवालः सोमवासरे सिद्धार्थनगरजनपदम् आगत्य जिलाधिकारिपदस्य कार्यभारं विधिवत् स्वीकृतवान्। जनपदे तस्य आगमने प्रशासनिकाधिकारिभिः स्वागतं कृतम्। ततः सः सर्वप्रथमं कोषागारम् (राजकोषकार्यालयम्) प्राप्य जिलाधिकारिरूपेण पदभारं गृहीतवान्। कार्यभारग्रहणानन्तरं जिलाधिकारी महोदयः समाहरणालयपरिसरस्य निरीक्षणं कृतवान्। तत्र विभिन्नेषु विभागीयपटलेषु नियुक्तैः अधिकारिभिः कर्मचारिभिश्च सह परिचयं प्राप्तवान्। अस्मिन् अवसरे समाहरणालयम् आगतवतः जनानां समस्याः अपि श्रुतवान् तथा तासां शीघ्रं समाधानाय सम्बन्धितेभ्यः अधिकारिभ्यः आवश्यकान् निर्देशान् प्रदत्तवान्। वार्तामाध्यमैः सह सम्भाषणावसरे नवागतः जिलाधिकारी गौरवसिंहसोगरवालः स्वकीयाः प्राथमिकताः प्रकाशयन् अवदत् यत् आगामीविधानसभा- निर्वाचनस्य सज्जता, निर्वाचनसम्बद्धानि कार्याणि, जनगणना तथा स्वगणना, परालीप्रबन्धनं, कृषकेभ्यः पर्याप्तमात्रायाम् उर्वरकस्य उपलब्धतायाः सुनिश्चितीकरणं च तस्य प्रमुखासु प्राथमिकतासु अन्तर्भवन्ति। सः अवदत् यत् शासनस्य भावनानुरूपं जनकल्याणकारीयोजनानां निर्धारितसमये कार्यान्वयनं, शासननिर्गत- निर्देशानां च प्रभाविपालनं सुनिश्चितीकरणम् अपि तस्य प्रमुखं लक्ष्यम् अस्ति। नवागतजिलाधिकारिणा उक्तं यत् जनहितस्य संरक्षणं, प्रशासनिककार्येषु गतिशीलता, शासकीययोजनानां लाभं पात्रजनानां यावत् प्रापयितुं ध्यानं प्रदास्यते।



# योगिनः पत्रिका' कॉफी-टेबल-पुस्तकायाः विमोचनम् जनगणना-२०२७ अभियानस्य च उत्तरप्रदेशे शुभारम्भः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ। उत्तरप्रदेशस्य पञ्चविंशतिकोटिसंख्याकाः प्रदेशवासिनः मम परिवारस्य सदस्याः सन्ति। अस्य परिवारस्य सुखदुःखैः, आशाभिः, उपलब्धिभिः, संकल्पैश्च सह सततं सम्बद्धः भवितुं 'योगिनः पाती' इति पत्रिका मम कृते आत्मीयसंवादस्य महत्त्वपूर्णं माध्यमम् अस्ति। इति उत्तरप्रदेशस्य मुख्यमन्त्री योगी आदित्यनाथः अवदत्।

गतपञ्चाशदधिकसप्ताहेभ्यः अहं प्रत्येकस्य पत्रस्य माध्यमेन प्रदेशवासिभिः सह स्वकीयविचारान् भावनाश्च निरन्तरं संविभजामि। एतत् केवलं पत्रलेखनं न, अपितु स्वपरिवारस्य सदस्यैः सह आत्मीयतया संवादं कर्तुम् एकः विशेषः अवसरः अस्ति इति मुख्यमन्त्रिणा उक्तम्। अद्य अस्यामेव आत्मीययात्रायाम् आधारितायाः 'योगिनः पाती' इति कॉफी-टेबल-पुस्तिकायाः विमोचनसमारोहः भविष्यति। अस्याः पुस्तिकायाः प्रदर्शिन्याः आभासीयम् उद्घाटनमपि मुख्यमन्त्रिणा करिष्यते।

तदनन्तरं विश्वस्य बृहत्तमस्य भारतस्य च प्रथमस्य अङ्कीयजनगणनाभियानस्य 'जनगणना-२०२७' द्वितीयचरणान्तर्गतं उत्तरप्रदेशे स्वगणनाप्रक्रियायाः (नवम्बरमासस्य १६ दिनाङ्कात् ३० दिनाङ्कपर्यन्तम्), गृहगृहं जनगणनाप्रक्रियायाः (२०२६ तमवर्षस्य दिसम्बरमासस्य प्रथमदिनाङ्कात् २०२७ तमवर्षस्य जनवरीमासस्य चतुर्थदिनाङ्कपर्यन्तम्) शुभारम्भमपि मुख्यमन्त्री करिष्यति।

मुख्यमन्त्रिणा उक्तं यत् प्रदेशस्य प्रत्येकस्य नागरिकस्य सहभागितया जनगणनायाः इयं महत्त्वपूर्णा प्रक्रिया सफलतया सम्पादनीया। एतदर्थं सर्वेषां प्रदेशवासिनां सामूहिकं दायित्वम् अस्ति। अतः जनसहभागितायाः जनविश्वासस्य च भावनां सुदृढीकृत्य 'विकसितउत्तरप्रदेशस्य' संकल्पं नवीनां गतिं प्रदातुं सर्वैः मिलित्वा प्रयत्नः करणीयः। मुख्यमन्त्रिणा प्रदेशस्य सर्वेषां नागरिकानां सक्रियसहभागितायै आह्वानं कृतम्।

# संस्कृतप्रतिभान्वेषणस्य राज्यस्तरीय- प्रतियोगितानां प्रथमचरणं नवम्बरमासस्य २८ दिनाङ्कात् लखनऊमहानगरे प्रारप्स्यते

**हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, लखनऊ।** संस्कृतभाषायाः प्रचार-प्रसारं प्रतिभानां संवर्धनं च उद्दिश्य संस्कृतप्रतिभान्वेषणस्य राज्यस्तरीय- प्रतियोगितानां प्रथमचरणस्य आयोजनं वर्षे २०२६ तमे नवम्बरमासस्य २८ दिनाङ्कात् लखनऊमहानगरे प्रारप्स्यते। अस्मिन् राज्यस्तरीय-प्रतियोगिताकार्यक्रमे श्लोकान्त्याक्षरी, लघुसिद्धान्तकौमुदी, अमरकोशः, अष्टाध्यायी, तर्कसंग्रहः इत्येतासु प्रतियोगितासु चयनिताः प्रतिभागिनः निर्धारितितिथिषु प्रतियोगितायां भागं ग्रहीतुं लखनऊम् आगन्तुं सज्जाः भवेयुः।

## प्रतियोगितानाम् आयोजनतिथयः

**प्रथमः दिवसः- २८ नवम्बर २०२६**

अस्मिन् दिने लघुसिद्धान्तकौमुद्याः, अमरकोशस्य च कण्ठस्थपाठप्रतियोगितयोः आयोजनं भविष्यति।

द्वितीयः दिवसः- २९ नवम्बर २०२६

अस्मिन् दिने श्लोकान्त्याक्षरीप्रतियोगितायाः, तर्कसंग्रहस्य च कण्ठस्थपाठप्रतियोगितायाः आयोजनं भविष्यति।

**तृतीयः दिवसः- ३० नवम्बर २०२६**

अस्मिन् दिने अष्टाध्याय्याः कण्ठस्थ-पाठप्रतियोगितायाः आयोजनं भविष्यति।

## प्रतियोगितासंयोजकैः सह सम्पर्कः

प्रतिभागिनः स्वस्वप्रतियोगितासम्बद्धां विस्तृतां सूचनां प्रतिदिनं सायं पञ्चवादनतः षड्वादनपर्यन्तं सम्बन्धितेभ्यः संयोजकेभ्यः प्राप्तुं शक्नुवन्ति।

1- श्लोकान्त्याक्षरीप्रतियोगिता- दीपकमिश्रवर्यः। दूरभाषः- ८५९५६५६६५८।

2- लघुसिद्धान्तकौमुदी तर्कसंग्रहप्रतियोगिते च- पवनकुमारवर्यः। दूरभाषः- ९९८४५३९३२७।

3- अमरकोशः, अष्टाध्यायीप्रतियोगिते च- महकगुप्तावर्या। दूरभाषः- ८८६९९१२१४६।

**चयनितप्रतिभागिभ्यः विशेषानुरोधः**

सर्वे चयनिताः प्रतिभागिनः स्वस्वप्रतियोगितायाः निर्धारितितिथिम् आवश्यकनिर्देशान् सम्बन्धितेभ्यः संयोजकेभ्यः च अवश्यं प्राप्नुयुः। निर्धारितितौ प्रतियोगितायां स्वप्रतिभागित्वं सुनिश्चितं कुर्वन्तु। प्रतियोगितासम्बद्धाः सर्वाः आवश्यकसूचनाः संस्कृतप्रतिभान्वेषणस्य जालपुटे विद्यमाने सूचनापट्टे अपि उपलब्धाः भविष्यन्ति। अतः सर्वेषां चयनितप्रतिभागिनां कृते निर्धारितसमये लखनऊम् आगत्य प्रतियोगितासु उत्साहपूर्वकं सहभागितां कर्तुं विशेषरूपेण आग्रहः कृतः अस्ति।



# श्रीश्रीमन्नारायणाय नमः

आत्मज्ञानिनः स्वाभाविकाः सद्गुणाः- जगद्गुरोः रङ्गनाथाचार्यस्य प्रतिपादनम्।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, बिहार। जगद्गुरुः रङ्गनाथाचार्यः महोपनिषदि (षष्ठोऽध्यायः, २९-३० श्लोकौ) प्रतिपादितस्य आत्मज्ञानस्य महत्त्वं वर्णयन् अवदत् यत् आत्मज्ञानप्राप्तस्य पुरुषस्य जीवनं स्वाभाविकतया सद्गुणैः विभूषितं भवति।

श्लोकः-

**निराशता निर्भयता नित्यता समता ज्ञता।**
**निरीहता निष्क्रियता सौम्यता निर्विकल्पता।**
**धृतिर्मैत्रीमनस्तुष्टिर्मृदुता मृदुभाषिता।**
**हेयोपादेयनिर्मुक्ते ज्ञे तिष्ठन्त्यपवासनम्॥**

भावार्थः- यथा सूर्येण सह प्रकाशः तापश्च स्वाभाविकतया प्रादुर्भवतः, तथैव यदा मनुष्यः समस्ताभ्यः वासनाभ्यः विमुक्तः सन् हेयस्य उपादेयस्य च द्वन्द्वात् अतीतो भूत्वा आत्मज्ञानं प्राप्नोति, तदा तस्मिन् आत्मज्ञे निराशता, निर्भयता, समता, मैत्री, मनस्तुष्टिः, धैर्यं, सौम्यता, मृदुता, मधुरभाषिता च इत्यादयः सद्गुणाः स्वाभाविकतया निवसन्ति।

जगद्गुरुः रङ्गनाथाचार्यः अवदत् यत् आत्मज्ञानी पुरुषः संसारस्य सुखदुःखयोः, उचितानुचितयोः, प्रियाप्रिययोश्च द्वन्द्वेभ्यः मुक्तः सन् परमशान्तौ प्रतिष्ठितो भवति। आत्मज्ञानं केवलं बौद्धिकज्ञानस्य विषयः नास्ति, अपि तु जीवनस्य आन्तरिक- परिष्कारस्य, मनसः निर्मलतायाः तथा परमशान्तेः प्राप्तेः श्रेष्ठः मार्गः अस्ति। ॥आत्मज्ञानमेव परमं सुखम्

# जनहितस्य प्रखरा वाणी, समाजस्य च जागरूकः प्रहरी अस्ति पत्रकारिता

हिमसंस्कतवार्ताः-वृजेशकुमारपाण्डेयः

लोकतन्त्रस्य सशक्ताभिव्यक्तिः, जनहितस्य प्रखरा वाणी, समाजस्य च जागरूकः प्रहरी अस्ति पत्रकारिता। सत्यनिष्ठया, निष्पक्षतया, निर्भीकतया च जनचेतनायाः जागरणाय पत्रकारबन्धुभिः क्रियमाणः प्रयासः सर्वथा प्रशंसनीयः अस्ति। पत्रकारितायाः माध्यमेन समाजस्य समस्याः, जनसामान्यस्य भावनाः, राष्ट्रस्य च विविधाः घटनाः जनसमक्षं प्रस्तूयन्ते। पत्रकाराः स्वकीयया लेखन्या समाजस्य दिशानिर्देशने महत्त्वपूर्णां भूमिकां निर्वहन्ति। पत्रकारितायाः स्वातन्त्र्यं, लेखन्याः निष्पक्षता, पत्रकारितायाः च गरिमा सदैव अक्षुण्णा तिष्ठतु। सत्यस्य विजयः भवतु। लेखन्याः स्वातन्त्र्यं चिरं जीवतु। पत्रकारितायाः गौरवं वर्धताम्। अस्मिन् राष्ट्रियपत्रकारदिवसे हिमसंस्कृतवार्तापरिवारस्य पक्षतः देश-विदेशेषु कार्यरताः सर्वेभ्यः पत्रकारबन्धुभ्यः हार्दिक्यः शुभकामनाः, सादरं नमनं च।

**हिमसंस्कृतवार्तापरिवारः**

# जीवनप्रभात-स्थाने, गान्धिधाम्नि संस्कृतभारत्याः

## सौराष्ट्रप्रान्तस्य आवासीय- संस्कृत- प्रबोधनवर्गस्य शुभारम्भः




**"भारतस्य स्वत्वं, ज्ञानम्, आचारः, परम्पराश्च संस्कृते निहिताः सन्ति। तेषां पुनर्जागरणस्य कार्यं संस्कृतभारती कुर्वती अस्ति।"- डॉ. महेशभाई ओझा**

हिमसंस्कृतवार्ताः- जगदीश डाभी, गुजरात। गान्धिधाम्नि स्थिते जीवनप्रभात-स्थाने संस्कृतभारत्याः सौराष्ट्रप्रान्तेन दिनाङ्कात् १६ नवम्बरतः २२ नवम्बरपर्यन्तं २०२६ तमे वर्षे आयोज्यमानस्य सप्तदिवसीयस्य आवासीय- संस्कृत- प्रबोधनवर्गस्य भव्यः शुभारम्भः अभवत्। वर्गस्य उद्घाटनसमारोहे विविधक्षेत्राणां गणमान्याः अतिथयः उपस्थिताः आसन्।

उद्घाटनसमारोहे अध्यक्षस्थानम् अलङ्कृतवन्तः संस्कृतभारत्याः पश्चिमक्षेत्रस्य विद्वत्परिषदः प्रमुखाः डॉ. कृष्णप्रसादः निरौलाजी। मुख्यातिथिरूपेण राष्ट्रिय- स्वयंसेवक- सङ्घस्य सौराष्ट्रप्रान्तस्य कार्यवाहः डॉ. महेशभाई ओझा, पूज्यश्री सन्ध्यागिरीबापु- संस्कृतमहाविद्यालयस्य, सामखियारी इत्यस्य प्रधानाचार्यः डॉ. रविशङ्करभाई राजगोर, आर्यसमाजस्य गान्धिधाममन्त्री गुरुदत्तशर्माजी, भारतविकासपरिषदः अध्यक्षः जखाभाई हुंबल, संस्कृतभारत्याः सौराष्ट्रप्रान्तस्य मन्त्री डॉ. प्रणवभाई राज्यगुरुः, वर्गाधिकारी अखिलेश आर्यजी च उपस्थिताः आसन्।

अस्मिन्नवसरे डॉ. महेशभाई ओझा महोदयः स्वकीयसम्बोधने अवदत् यत् भारतस्य स्वत्वं, ज्ञानम्, आचारः, परम्पराश्च संस्कृतभाषायां निहिताः सन्ति। अस्य अमूल्यस्य धरोहरस्य पुनर्जागरणं कृत्वा जनमानसे प्रसारयितुं संस्कृतभारती महत्त्वपूर्णं कार्यं कुर्वती अस्ति। संस्कृतं न केवलं भाषा, अपि तु भारतीयज्ञानपरम्परायाः संस्कृतेश्च आधारः अस्ति। कार्यक्रमस्य धन्यवादज्ञापनं संस्कृतभारत्याः सौराष्ट्रप्रान्तस्य सदस्या, वर्गव्यवस्थापिका, शिवानी परमार महोदया कृतवती। सम्पूर्णसत्रस्य सञ्चालनं प्रान्तप्रशिक्षणप्रमुखः धर्मेन्द्रभाई मेमकिया अकरोत्।अस्मिन् सप्तदिवसीये आवासीय- संस्कृत- प्रबोधनवर्गे प्रायः पञ्चाशत् संस्कृतानुरागिणः सहभागिनः सन्ति। तेषु प्रायः षट् संस्कृतकुटुम्बानि अपि सहभागितां कुर्वन्ति। अस्य वर्गस्य विशेषता अस्ति यत् अत्र बालकाः, युवानः, व्यवसायिनः, शिक्षकाः, चिकित्सकाः, गृहिण्यः, अधिवक्तारः, न्यायाधीशाः, निवृत्ताधिकारिणः इत्यादयः समाजस्य विविधवर्गेभ्यः जनाः च उत्साहेन सहभागिनः भवन्ति।अस्य वर्गस्य विशेषता अस्ति यत् सर्वे सहभागिनः प्रतिदिनं प्रातःवादनात् पञ्चवादनात् सार्धपञ्चवादनपर्यन्तं न, अपि तु प्रातः ५:३० वादनात् रात्रौ १०:०० वादनपर्यन्तं सम्पूर्णे संस्कृतमये वातावरणे निवसिष्यन्ति। अस्मिन् काले संस्कृतसम्भाषणं, व्याकरणं, गणकार्यं, विशेषसत्राणि, क्रीडासत्राणि, बौद्धिकसत्राणि च आयोज्यन्ते। एताः सर्वाः गतिविधयः संस्कृतभाषायामेव भविष्यन्ति। केवलम् एतावदेव न, अपि तु रात्रिकालीन- अनौपचारिक- कार्यक्रमेष्वपि गीतानि, नाटकानि, हास्यविनोदाः, संवादाः, अभिनयः, विविधाः प्रतियोगिताः, गरबानृत्यादयः कार्यक्रमाः अपि संस्कृतभाषायामेव प्रस्तुताः भविष्यन्ति। एवं संस्कृतं केवलम् अध्ययनस्य भाषा न भूत्वा दैनन्दिनजीवनस्य व्यवहारभाषा भवेत् इति उद्देश्यम् आदाय अस्य आवासीयवर्गस्य आयोजनं कृतम् अस्ति।

## व्याकरणचिन्तनम्- ११

त्व/तल्-प्रत्ययौ भाववाचकौ भवतः, नपुंसके/ स्त्रियां च क्रमेण। यथा-
देवत्वम्- नपुंसके, देवता- स्त्रियाम्।
द्वयोः प्रत्ययोः १०/१०- वाक्योदाहरणानि अभ्यासाय अत्र उपस्थाप्यन्ते। यथा- त्व-
१. ब्राह्मणस्य ब्राह्मणत्वं सदाचारेण शोभते।
२. क्षत्रियस्य क्षत्रियत्वं शौर्ये दृश्यते।
३. बालकस्य बालत्वं कौतुकेन प्रकटते।
४. गुरोः गुरुत्वं सच्छिक्षादानेन वर्धते।
५. शिष्यस्य शिष्यत्वं व्यवहारेषु अवलोक्यते।
६. साधोः साधुत्वं परोपकारे दृश्यते।
७. कवेः कवित्वं काव्येन प्रसिद्धं भवति।
८. वीरस्य वीरत्वं युद्धे परीक्ष्यते।
९. पत्न्याः पत्नीत्वं पतिसेवायां दृश्यते।
१०. भ्रातुः भ्रातृत्वं स्नेहभावे तिष्ठति।
तल्-११. जनता राज्ञः रक्षणं करोति।
१२. देवता सर्वत्र पूज्यते।
१३.एकता एव देशस्य बलम् अस्ति।
१४. अनेकता अपि एकतायां लीयते।
१५. सज्जनता सर्वदा वन्दनीया भवति।
१६. दुर्जनता सर्वैः त्याज्या।
१७. पवित्रता मनसः शुद्ध्या भवति।
१८. नम्रता विदुषां भूषणम् अस्ति।
१९. समानता समाजस्य आधारः अस्ति।
२०. महानता त्यागेन एव लभ्यते।

अवधेयम्-
त्व- नपुंसकलिङ्गे भवति। यथा- गुरुत्वम्, कवित्वम्, वीरत्वम्,
तल्- स्त्रीलिङ्गे भवति। यथा- जनता, देवता, एकता, नम्रता,
लिङ्गभिन्नत्वादपि उभयोः अर्थदिशा एकत्वं वर्तते । यथा- वीरत्वं = वीरता, गुरुत्वं = गुरुता, विनयत्वं = विनयता, इत्यादि

हिमसंस्कृतवार्ताः, ईदरथीरजः

# वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अद्य काः विचित्राः वार्ताः सन्ति?

**काव्या-** नमस्ते नन्दिनि। अभिवादनस्य कृते कृतज्ञताम् अर्पयामि तुभ्यम्। अद्य मया एकः विचित्रः वृत्तान्तः पठितः। जापानदेशे एकेन पुरुषेण पञ्चदश वर्षाणि यावत् प्रतिदिनं समानम् एव भोजनं भुक्तम्। "किं खादनीयम्" इति निर्णय- क्लेशं परिहर्तुं तेन एषः नियमः स्वीकृतः। तेन उक्तं यत् एतेन उपायेन तस्य सर्वा बुद्धिः स्वकार्ये एव स्थिता।

**नन्दिनी-** अहो आश्चर्यम्! पञ्चदश वर्षाणि एकम् एव भोजनम्! मम तु एतत् श्रुत्वा एव विस्मयः जातः। अधुना प्रकृति-सम्बद्धां विचित्रां वार्तां शृणु। समुद्र-शैवालस्य विषये वैज्ञानिकैः नूतनं तथ्यं ज्ञातम्। सामान्यतः शैवालानां प्रजननं मैथुनेन भवति। किन्तु नूतने शोधे दृष्टं यत् यदा सागरे स्त्री-शैवालः पुरुष-शैवालं न लभते, तदा सः आपत्काले एकाकी एव स्व-प्रतिकृतिं जनयति। यद्यपि सा प्रतिकृतिः तावत् उत्तमा न भवति, तथापि सन्ततिनाशात् एषः आपत्कालीनः विकल्पः वरः इति वैज्ञानिकैः कथितम्।

**काव्या-** सत्यम्! शैवालस्य एषः उपायः मया पूर्वं कदापि न श्रुतः। प्रकृतिः सर्वदा स्व-संरक्षणार्थं मार्गम् अन्विच्छति। अधुना मया पठितां तन्त्रज्ञानजगतः एकां भयावहां घटनां शृणु। यूरोप-देशेषु कैश्चित् सङ्गणक-दुर्वृत्तैः (हैकर-जनैः) दूरतः एव विपणीनां शीतकयन्त्राणि वशीकृतानि। तैः धनं न याचितम्, अपि तु तेषां यन्त्राणाम् उष्णता पञ्चाशत् सेल्सियस-अंश-पर्यन्तं वर्धिता। रात्रौ शीतलतायाः स्थाने महती उष्णता जाता। प्रातःकाले आपणिकैः सर्वं हिमरक्षितम् अन्नं पक्वं नष्टं च दृष्टम्।

**नन्दिनी-** अहो! एषा तु महती हानिः जाता। यन्त्राणाम् एतादृशं दुरुपयोगं श्रुत्वा मम मनसि महान् खेदः उत्पन्नः। परन्तु अधुना एका उपयोगिनी विचित्रा च आविष्कार-वार्ता अस्ति। जैव- अभियन्तृभिः एकं यान्त्रिकं पादकोशयुगलम् निर्मितम्। अस्मिन् पादकोशयुगले सूक्ष्माणि यन्त्रसूत्राणि स्थापितानि। यदा जनः चलति, तदा एतत् पादकोश-युगलं पादस्य मध्यभागं दृढं करोति। परीक्षणे दृष्टं यत् अनेन आविष्कारेण मांसपेशीनां श्रमः अतीव न्यूनः जातः, तथा च विना श्रमेण दूरं गन्तुं शक्यते।

**काव्या-** अहो अद्भुतम्! एषः यान्त्रिकः पादकोशः तु अतीव उपयोगी आविष्कारः अस्ति! एतत् श्रुत्वा मम चलन-सम्बद्धा चिन्ता अपि गता। एतासां विचित्र-वार्तानां चर्चायाः कृते कृतज्ञताम् अर्पयामि तुभ्यम्।

**नन्दिनी-** सत्यम् उक्तं त्वया, काव्ये! अद्य अस्माभिः चतस्रः अतीव विचित्राः वार्ताः चर्चिताः। तव सहभागाय कृतज्ञताम् अर्पयामि तुभ्यम्। पुनः मिलामः। शुभं भूयात्!